# कर्नाटकसंस्कृताध्ययनम्

## विद्वत्पत्रिका

### कर्नाटकसंस्कृतविश्वविद्यालयस्य शोधपत्रिका

# Karnāṭakasamskṛtādhyayanam Vidvatpatrikā

*A Journal*

*of*

*Karnataka Samskrita University*

Vol. 6, Issue 1 & II

Chief Editor

K. E. Devanathan

Editor

Shivani V

Karnāṭakasamskṛtādhyayanam
Vidvatpatrikā ISSN : 2249-1104
*A Journal of*
*Karnataka Samskrita University*

Vol. 6, Issue 1 & II
October 2018

© Prasaranga, Karnataka Samskrita University

**Chief Editor**

Prof. K. E. Devanathan

(Vice Chancellor, KSU, Bangalore)

**Editor**

Prof. Shivani V.

(Director, Prasaranga, KSU, Bangalore)

**Review Committee Members**

Prof. Shrinivasa Varakhedi, (Vice Chancellor, KKSU, Nagpur)

Prof. Michael, (Gulbarga University)

Dr. Shivarajappa, (Mysore University)

Prof. Veeranarayana Pandurangi,

(Dean, Vedanta Faculty, KSU, Bangalore)

Prof. B. V. Venkataramana, (Dean, Shastra Faculty, KSU, Bangalore)

**Convenors**

Dr. Santosh Hanagal

Deputy Director, Prasaranga

Dr. Govinda B.

Deputy Director, Prasaranga

Dr. Mallanagowda S.

Assistant Director, Prasaranga

# विषयसूची


## Volume 6, Issue 1 2

1. **वेदान्तसूत्राणां कुत्र तात्पर्यम्?**

    श्रीनिवासः वरखेडी . . . . . . . . . . . . . . . . . . . . . . 4

2. **न्यायदर्शनविकासे कतिपयसंभावनाः**

    वीरनारायण पाण्डुरङ्गी . . . . . . . . . . . . . . . . . . . . . 15

3. **स्थानिवत्सूत्रार्थविमर्शः**

    स्वामी जपसिद्धानन्दः . . . . . . . . . . . . . . . . . . . . . 24

4. **सज्जनेन्द्रप्रयोगकल्पद्रुमे व्याकरणांशाः**

    नागरत्ना हेगडे . . . . . . . . . . . . . . . . . . . . . . 43

5. **तन्त्रयुक्तिः - प्राचीनभारतीयशास्त्रग्रन्थप्रणयनपद्धतिः**

    म. जयरामः . . . . . . . . . . . . . . . . . . . . . . . 55

6. **न्यायमतरीत्या कालः**

    भास्करभट्टः जोशि . . . . . . . . . . . . . . . . . . . . . 70

7. **दैवधातुपाठोक्ता ज्ञाधातु-क्षिधातुविषयिणी समीक्षा**

    उदयन हेगडे . . . . . . . . . . . . . . . . . . . . . . . 75

8. **शब्दस्वरूपविज्ञानम्**

    रामकृष्णभट्टः के . . . . . . . . . . . . . . . . . . . . . 85

9. **कठमुण्डकोपनिषदुक्तयोगविचारः**

    श्रुतिः एच्. के. . . . . . . . . . . . . . . . . . . . . . . 96

10. **खण्डकाव्यलक्षणविमर्शः**

    आर्. तिम्मणणः . . . . . . . . . . . . . . . . . . . . . . 103

**Volume 6, Issue 2** **116**

1. Means-Ends Analysis in Artificial Intelligence and Mimāṁsā
   K. S. Kannan . . . . . . . . . . . . . . . . . . . . . . . . 118
2. Water - the Life Spring of the Creation
   V. Girish Chandra . . . . . . . . . . . . . . . . . . . . . 140
3. A Cognitive Linguistic Analysis of Laukika Nyāya-s
   H. R. Meera . . . . . . . . . . . . . . . . . . . . . . . . 147
4. The Knowledge Structure in Sanskrit Kośas
   Sivaja S. Nair and Amba Kulkarni . . . . . . . . . . 161
5. Gadādhara's Theory of Śakti: A Semantical Analysis
   Paritosh Das . . . . . . . . . . . . . . . . . . . . . . . 175
6. The Ritual Practices In Vaiṣnava Temples (Divyadeśam) of Kerala Associated With Alvars: A Field Study
   Damodar Narayanan. C. N . . . . . . . . . . . . . . 186
7. Semantics of Morpho-syntactic Case Markers in Indian Languages: Sanskrit a Case Study
   Madhusoodana Pai. J, Sanjeev Panchal and Amba Kulkarni . . . . . . . . . . . . . . . . . . . . . . . . 197
8. Pāli dhātu Analysis
   Swati Basapur and Shivani V . . . . . . . . . . . . . 222

Contributers . . . . . . . . . . . . . . . . . . . . . . . . 235

# Abbreviations

| | | |
|---|---|---|
| प.शे. | - | परिभाषेन्दुशेखरः |
| परिभा. | - | परिभाषा |
| पृ. | - | पृष्ठसङ्ख्या |
| ल.शे. | - | लघुशब्देन्दुशेखरः |
| व्या. | - | व्याख्याता |
| सं. | - | सम्पादकः |
| संक. | - | सङ्कलनकर्ता/-कर्त्री |
| सि.कौ | - | वैयाकरणसिद्धान्तकौमुदी |
| सू. | - | सूत्रम् |
| पा.सू. | - | पाणिनीयसूत्रम् |
| स.प्र.का. | - | सज्जनेन्द्रप्रयोगकल्पद्रुमः कारिका |

# कुलपतिवचनम्

महतः आनन्दस्य विषयः यत्कर्नाटकसंस्कृतविश्वविद्यालयः 'कर्नाटकसंस्कृताध्ययनम्' इति विद्वत्पत्रिकां प्रकाशयति इति। इदानीं षष्ठसम्पुटस्य प्रथमद्वितीयाङ्कौ प्रकाश्येते। अस्मिन् निबन्धे भिन्नभिन्नशास्त्रीयाः लौकिकाः लेखाः विशिष्टविद्वद्भिः आरचिताः रत्नरूपेण समायोजिताः। संस्कृतभाषायामाङ्ग्लभाषायाञ्च अत्यन्तमुपादेयाः अंशाः अत्र योजिताः इति। उदाहरणरूपेण “Means-Ends Analysis in Artificial Intelligence and Meemamsa” इति लेखः विस्तृतया नवीनपद्धत्या मीमांसाप्रमेयाणाम् आधुनिकविज्ञानेन सह तुलनां करोति। अत्र हि विभिन्नाकारप्रदर्शनेन (Diagram) विषयः अत्यन्तं सरलतया निरूपितः। एवमेव बहवः प्रथिताः विद्वांसः आचार्यश्रीनिवासवरखेडिप्रभृतयः स्वोपज्ञतया बहून् शास्त्रीयान् विषयानत्र न्यरूपयन्। एवमेव युवानः विद्वांसः नूतनां पद्धतिमाश्रित्य शास्त्रीयमेव विषयं प्रत्यपादयन्।

अधुनातनकाले एतादृशनिबन्धाः समीचीनलेखविभूषिताः दुर्लभा इति वयं सर्वे जानीम एव। पुनः पुनः चिन्तनेन अन्यैः सह विचारणेन च नूतनाः अर्थाः अस्माकं प्रतिभान्ति। ते च अर्थाः यदि ग्रन्थरूपेण निबद्धाः तदा जिज्ञासूनामिदानीन्तनानां भविष्यतां च महान् उपयोगः भवति। एवमेव ज्येष्ठाः आचार्यपाण्डुरङ्गिप्रभृतयः यत्र निबन्धे स्वीयलेखं निबध्नन्ति, तत्र युवकानां लेखनावकाशः महते उत्साहवर्धनाय भवति।

अहं विविधविषयान् अत्यन्तोपादेयान् एकत्रानीय, एतादृशनिबन्धं सम्पादितवत्यै प्रो. वि.शिवानिमहोदयायै साधुवादान् निवेदयामि, अभिनन्दामि च महद्भिः लेखकैः परिपोषितोऽयं निबन्धः तस्याः महोदयायाः महतः प्रयत्नस्य फलमिति ताम्। अयं च निबन्धः विदुषां शोधच्छात्राणां च महते उपकाराय भवतु इति भगवन्तं प्रार्थये।

विदुषामनुचरः

का. इ. देवनाथन्

# सम्पादकीयम्

The Vidvatpatrikā - Karnāṭakasamskritādhyayanam - A journal of Karnataka Samskrita University is proud to complete its sixth issue. Over the past few years, this Journal has been regularly publishing various papers from both the Students' community and the well known Scholars, on topics related to academic subjects.

In the current year we are privileged to have the sagacity and guidance from Dr. K E Devanathan, the current Vice-Chancellor of Karnataka Samskrit University and along with him and the Deans of the various departments. We expect that we will not only maintain the standard established earlier, but would forge ahead to higher echelons in the field of promoting Sanskrit Knowledge. And the stress would continue to be on meeting the academic demands of the Scholar community, as before..

The current journal issues, we present a diverse selection of stimulating articles from scholars and students from diverse disciplines. We selected these papers from a pool of more than 30 submissions from scholars of across the nation.

We hope that the Journal will continue to attract submissions from a wide range of students, and we look forward to featuring research from more institutions in the future. We thank all the students and scholars who submitted papers. The Journal's Board of Advisers also offered us valuable recommendations and guidance.

The Journal's present issue has two volumes, containing 18 papers selected from the above mentioned 30 submissions. The selected papers are on various topics like, Vyakarana, Tarka, Vedanta and the like. All these articles, are seen to have in-depth analyses from distinguished scholars. Further, the present issue of the Journal deals with Inter-disciplinary research also.

As always, I would like to thank our steadfast faculty advisors, Prof Shrinivasa Varakhedi, Prof Girish Chandra, Prof Veeranarayana Pandurangi, Prof. B. V. Venkataramana and Prof. C. P. Palaiah. Their guidance and support made our journal possible, and I am deeply indebted to them for the time and effort that they put into our journal. I am grateful to the scholars who trusted us for their contributions.

I also thank Deputy Directors of Prasaranga, Dr. Santosh Hanagal, Dr. Govinda and other University authorities and faculty members for their unconditional support.

We welcome articles from learned scholars across the Globe. We want to make our journal the platform of the International Comparative discussion. We invite articles from all branches of Sanskrit and Indology. Articles on interdisciplinary subjects are also appreciated.

In conclusion, I would like to thank all prominent members of our Editorial Board for joining us in this fascinating and promising academic endeavour.

**Shivani V.**

**Editor**

Volume 6, Issue 1

1

## वेदान्तसूत्राणां कुत्र तात्पर्यम्?

श्रीनिवासः वरखेडी

समस्तस्य वेदान्तशास्त्रस्य प्रस्थानत्रयमालम्बनम्। तत्रापि उपनिषत्-प्रस्थानस्य वेदेषु अन्तर्गतत्वात् गीताया अपि तद्व्याख्यारूपत्वात् विचार्यशास्त्र एवान्तर्भावः इत्यतः वेदार्थनिर्णायकन्यायग्रथनात्म-कत्वात् ब्रह्मसूत्राणां भगवता व्यासेन ग्रथितानाम् अस्ति विशिष्टं स्थानम्। सर्वोऽपि उपनिषत्प्रतिपादितः सिद्धान्तः सूत्रारूढः भवन् न्यायोपब्रम्हितः सिद्धान्तपदवीम् अधिरोहति। अत एव वेदानाम् उपनिषत्सहितानामपि परे ब्रह्मणि निष्ठां सम्पादयन्ति ब्रह्मसूत्राणि 'परविद्या' इत्युच्यन्ते।

"द्वे विद्ये वेदितव्ये परा चैवापरा चे"ति विद्याद्वयमुद्दिश्य तत्र अपरा ऋग्वेदो यजुर्वेदः सामवेदोथर्ववेदः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति साङ्गान्वेदान् अपरविद्यात्वेनोक्त्वा "अथ परा यया तदक्षरमधिगम्यते" इति पराविद्या व्याख्याता। सा तावत् वेदादिशास्त्रप्रकरणात् अक्षराधिकरणत्वलिङ्गाच्च अक्षरापरनामकपर-ब्रह्मप्रतिपादकं शास्त्रमेव। अस्य च परत्वं = प्रमाणत्वेनैव-परधार्मिक इतिवत् निर्णेतव्यानि भवन्ति ऋगादिशास्त्राणि। उपनिषदोऽपि तत्रैवान्तर्गताः। अशेषाणां शास्त्राणां परब्रह्मनिष्ठत्वयोगेन परविद्यात्वं सेत्स्यति। तच्च इतिकर्तव्यतास्थानीयानां ब्रह्मसूत्राणाम् अनुग्रहेणैव इत्यतः अनुग्राहकाणां ब्रह्मसूत्राणामेव परविद्यात्वमङ्गीकर्तव्यम्।

ब्रह्ममीमांसाशास्त्राव्युत्पादितन्यायाननुगृहीताः वेदादयः ब्रह्मपरा न भवन्तीति। तथापि ब्रह्ममीमांसायाः न स्वातन्त्र्येण प्रामाण्यमिति चेत् सम्यग्वेदादियुक्तस्यैव तस्य पराविद्यात्वं स्वीक्रियते। अत एव ब्रह्ममीमांसाशास्त्रं व्यासोपज्ञमाचार्यमाध्वेन प्रमाणतममिति गीयते।

वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता।
आप्तवाक्यतया तेन श्रुतिमूलतया तथा॥
युक्तिमूलतया चैव प्रामाण्यं त्रिविधं महत्।
दृश्यते ब्रह्मसूत्राणामेकधान्यत्र सर्वशः॥
अतो नैतादृशं किञ्चित् प्रमाणतममिष्यते।[1]

तदेवं माध्वदर्शने ब्रह्ममीमामांसाशास्त्रस्य प्राशस्त्यं महत्वं च प्रत्यपादि।

इत्थं परमप्रमाणतमस्यास्य शास्त्रस्य यत्परत्वं तत्परत्वमेव सकल-सच्छास्त्राणामिति अविवादम्। किम्परमिदं ब्रह्ममीमांसाशास्त्रम्? इति विचारे किमधिकं विचारणीयं परं ब्रह्मैव अत्र परं प्रतिपाद्यमिति तावत् स्फीतालोकमध्यवर्तिघटवत् स्फुटमेव। परन्तु किं तद्ब्रह्म? कीदृशम्? किंस्वरूपम्? इत्यादिषु विवदमानाः दृश्यन्ते वेदान्तिनः।

तत्र निर्गुणं सर्वात्मकं निरञ्जनम् अविद्यया जीवेश्वरभावापन्नम् अन्यथा शुद्धचिदात्मकं परं ब्रह्मैव श्रुत्या सत्यज्ञानादिपदैः प्रतिपाद्यमिह विचार्यते। तच्च ब्रह्म स्वप्रकाशमित्यतः शब्दादिना अवेद्यम्। केवलं लक्षणया वृत्त्या द्योत्यते इति सकलवेदान्तवाक्यानां ब्रह्मणि समन्वयः प्रदर्श्यते। तदीयाविद्यानिवृत्तये उपायाः निरूप्यन्ते।

[1] अनुव्याख्यानम् १.१.५-७

ततश्च ज्ञानिनः ब्रह्मैक्यप्रतिरूपम् अपुनरावृत्तिलक्षणं फलम् इति शाङ्करसिद्धान्तः। तत्र व्यवहारदृष्ट्या सगुणस्य ब्रह्मणः अङ्गीकारेऽपि तद्रूपं केवलमुपासनार्थम्। न तु वास्तवम्। सर्वमेतत् जगत् सगुणब्रह्मणः सृष्टेः फलरूपं मिथ्यैव; न परमार्थसत्। जीवाभिन्नं क्षेत्रज्ञनामकं परं ब्रह्मैव शारीरशब्देन उच्यते इति इदं शारीरकसूत्रम् इत्यपि अभिधीयते। इत्थञ्च जीवब्रह्माभेदे सूत्रकारस्य सम्मतिः वक्तव्या। स्वतःसिद्धस्य निर्गुणस्य निर्धर्मकस्य ब्रह्मणः कस्यापि धर्मस्य योगाभावेन कथं वा विचारः युज्येत? प्रतिपाद्यस्य ब्रह्मणः अपारमार्थिकं लक्षणं किञ्चित् जन्माद्यस्य यतः इति किमर्थमुच्यते? स्वतःप्रकाशस्य अतएव प्रमाणावेद्यस्य ब्रह्मणः शास्त्रप्रमाणकत्वं कथम्? सर्वधर्मरहिते तस्मिन् शास्त्रप्रतिपादितः धर्मसमन्वयः सम्भवेत्? अस्तु सगुणे एव ब्रह्मणि तदेतस्य सर्वस्योपपत्तिः तथापि एकस्योपासनया अपरस्यैव विरुद्धस्य रूपस्य कथं प्राप्तिः? तद्विज्ञानेन कथं वा सर्वविज्ञानम्? नहि शुक्तिकाज्ञानेन मिथ्याभूतस्यापि रजतस्य ज्ञानं सम्पद्यते।

तथाच किं सर्वमिथ्यात्वोपपादनेन? किञ्च बन्धात् मोक्षप्राप्तये ब्रह्मज्ञानार्थं वेदवाक्यैः विचारस्य कर्तव्यतां सूत्रयता व्यासेन भगवता वेदार्थनिर्णयाय प्रतिपाद्येऽर्थे धर्मान् उपन्यस्य वैदिकैः शब्दैः ब्रह्मणः प्रतिपाद्यत्वं समर्थितम्। तथाच सूत्राणि अन्तस्तद्धर्मोपदेशात्, विवक्षितगुणोपपत्तेश्च, सुखविशिष्टाभिधानादेव च, अदृश्यत्वादिगुणको धर्मोक्तेः, रूपोपन्यासाच्च, शब्दादेव प्रमितः, सर्वधर्मोपपत्तेश्च इति।

एवमेव भेदव्यपदेशाच्चान्यः, शारीरश्चोभयेऽपि हि भेदेनैनमधीयते, सुषुप्त्युत्क्रान्त्योः भेदेन, पृथगुपदेशात् इत्यादीनि सूत्राणि स्पष्टं भेदपराणि। अत एव हि - आनन्दगिरिटीकायां जीवब्रह्मणोः ऐक्यं न कोपि सूत्रकारः मुखतो वदति किन्तु सर्वत्र भेदमेव। अतः नैक्यमिष्टम् - तत्राह इत्येवं "प्रतिपाद्यन्तु शास्त्रार्थम् आत्मैकत्वमेव दर्शयति" इति भाष्यम् (शास्त्रदृष्ट्या तु) अवतारितम्।

एतदेव च व्यञ्जयद्भिः मधुसूदनसरस्वतीभिः -

न स्तौमि तं व्यासमशेषमर्थं सूत्राक्षरैर्यो न बबन्ध सम्यक्।
विनापि तैः सङ्ग्रथिताखिलार्थं तं शङ्करं नौमि सुरेश्वरञ्च॥
इत्युक्तम्।

तथा च शङ्करमतानुसारेणैव सूत्रकारस्य भेद एव अभिप्रेतः। न तु ब्रह्मात्मैक्यम्।

तदेतत्सर्वं पूर्वपक्षविमर्शनम्। मध्वभाष्यञ्च अतिसङ्क्षिप्तम्। आचार्य-मध्वेन सूत्रमधिकृत्य चत्वारः व्याख्याप्रबन्धाः विरचिताः।

भाष्यम् अर्थविस्तृतमतिगभीरं शब्दकायेनाल्पञ्च। प्रतिसूत्रं विचारः कृतः। न्यायविवरणाख्ये अपरस्मिन् ग्रन्थे प्रत्यधिकरणं न्यायाः प्रत्यवमृष्टाः। तृतीयञ्च अनुव्याख्यानं श्लोकवार्तिकवत् विस्तृतं पद्यरूपं परमतनिरासार्थं व्याख्यानम्। चतुर्थञ्च सूत्रार्थसङ्क्षेपरूपं ग्रन्थरत्नम्। इदं सूत्रमधिकृत्य प्रवृत्तं माध्वीयं वाङ्मयम्।

अस्ति किञ्चित् कथनीयं वैशिष्ट्यं मध्वभाष्यस्य।

१. वेदान्तसूत्राणि प्रत्येकमपि सिद्धान्तसूत्रम्। न किमपि पूर्वपक्षीयं पृथक्सूत्रम् ॥

२. प्रत्यधिकरणमर्थः व्यासवचनैः पुराणादिवाक्यैः पोषितः।

३. प्रथमाध्यायेन ब्रह्मणि न केवलं वाक्यप्रकरणसमन्वयः अपि तु नामसमन्वयं समर्थ्य ब्रह्मणः शब्दप्रतिपाद्यगुणपूर्णत्वं प्रतिपादितम्।

४. समग्रोऽपि वेदः परब्रह्मपर एवेति एककोटौ अन्तर्भावः। तस्मात् उपनिषदां पृथग् गणनं नास्ति।

५. इतरभाष्यकारैः प्रदर्शितः श्रुतिसमन्वयः वाक्यप्रकरणयोः। अत्र तु प्रत्यक्षर-प्रतिपदक्रमेण सर्वशब्दसमन्वयः।

तथाच प्रथमाध्याये आदौ पञ्च अधिकरणानि पीठिकारूपेण व्याख्यातानि। ततश्च अध्यायान्तं नामसमन्वयः सप्रमाणं प्रदर्शितः। तेन वेदानामनन्तशब्दानां परममुख्यया वृत्त्या ब्रह्मणि समन्वयेन तात्पर्यसमर्थनेन च सकलगुणपूर्णत्वं सिद्धम्। एवं सिद्धस्वरूपस्य ब्रह्मणः द्वितीयाध्याये शास्त्रान्तराविरोधसम्पादनेन निर्दोषत्वं समर्थितम्। तृतीये च तदपरोक्षसाधनानि निरूपितानि। तुरीये उत्क्रान्तिगत्यादिरूपः मोक्षः फलरूपः वर्णित इति चतुर्णामध्यायानां व्यवस्था द्रष्टव्या। तत्र सकलगुणपरिपूर्णे परब्रह्मणि आत्मशब्दोदिते नारायणे एव सकलवेदानां तात्पर्यमिति स्पष्टमुक्तमाचार्येण। तथाहि भाष्ये तदीयानि वचनानि।

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणः व्यासत्वेन अवततार। अथ इष्टानिष्टप्राप्तिपरि-हारेच्छूनां तद्योगम् अविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयन् चतुर्धा व्यभजत्। ऋग्वेदं चतुर्विंशतिधा, यजुः एकशतधा, साम

सहस्रधा, अथर्व द्वादशधा च। तदर्थनिर्णयाय ब्रह्मसूत्राणि चकार।[2] तत्र समग्रवेदार्थनिर्णयाय सूत्राणि चकार इति वचनं द्रष्टव्यम्। न केवलम् उपनिषदां, वेदानाम् अपितु निखिलशास्त्रजातस्य अर्थनिर्णयोऽत्र विहित इति भावः। तत्रैवोक्तं- शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः इति।

तदेतस्य निर्णायकशास्त्रस्य विषयादि-अनुबन्धवत्तासाधनेन आरम्भणीयत्वं साधयितुं तदुपयुक्ततया ज्ञानफलकस्य जिज्ञासारूपविचारस्य कर्तव्यत्वं समर्थयितुमादिमं सूत्रम् - ओम् अथातो ब्रह्मजिज्ञासा इति।

तत्र स्वात्मा न विचारविषयः, सिद्धत्वात्। न परात्मा, तेन प्रयोजनाभावात्। अनात्मनस्तु अन्यत एव सिद्धत्वात्। ततश्च ब्रह्मशब्दप्रतिपाद्यं किञ्चित् तत्त्वं विषयः इति वक्तव्यम्। तच्च अथ कस्मादुच्यते ब्रह्मेति? बृहन्तो ह्यस्मिन् गुणाः इति श्रुत्या गुणपूर्णं ब्रह्म अत्र अभिप्रेतमिति सिद्धम्। इत्थञ्च अथ = अधिकारसम्पादनानन्तरम्, अतः = स्वरूपानन्दाविभाविरूपमोक्षरूपफलसद्भावात्, तस्य च भगवत्प्रसादमन्तरा अलभ्यत्वात् ब्रह्मणः = गुणपूर्णस्य ब्रह्मशब्दप्रतिपाद्यस्य विष्णवाख्यस्य परतत्वस्य जिज्ञासा = वेदवाक्यैः विचारः कर्तव्य इति प्रथमसूत्रार्थः। तथाच ब्रह्मजिज्ञासायाः फलम् अपुनरावृत्तिलक्षणो मोक्षः इति चतुर्थाध्यायप्रतिपाद्येन सह आदिमसूत्रेण ज्ञायते। तत्र

[2] तच्चोक्तं स्कान्दे - नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् ।
किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ॥ गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते ।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः ॥ शरण्यं शरणं जग्मुर्नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः॥ अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ॥ चतुर्धा व्यभजत् तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥ इत्यादिना प्रमाणेन सोक्तः अर्थः समर्थितः।

जिज्ञासापदोदितस्य विचारस्य फलं ज्ञानम् = ब्रह्मज्ञानम्। तेनच मोक्षः इति सूत्राक्षरैः स्फुटं प्रतीयते। तदतिरिक्तं कथं ज्ञायत इति चेत् इत्थम् - ब्रह्मज्ञानेन हि मोक्षः चेत् घटादिज्ञानादपि मोक्षापत्तेः। तथाच विषयस्य ब्रह्मणः प्रयोजनेन मोक्षेण सम्बन्धो वक्तव्यः। तदुक्तम् - "बन्धको भवपाशेन भवपाशाच्च मोचकः" "नायमात्मा प्रवचनेन लभ्यः; न मेधया; न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यः। तस्यैव विवृणुते तनूं स्वाम्॥" "यस्य प्रसादात् परमार्तिरूपादस्मात् संसारान्मुच्यते नापरेण" इत्यादिप्रमाणैः ब्रह्मणः प्रसादमन्तरा न बन्धनिवृत्तिरिति सूत्राक्षिप्तं भवति। इत्थञ्च प्रसन्नः भगवान् परब्रह्मरूपः मोक्षं प्रददाति। तत्प्रसादश्च तज्ज्ञाननिबन्धनः। ज्ञानी प्रियतमोऽतो मे इति भगवद्वचनात्। तच्च जिज्ञासाद्वारैव श्रुत्यादिना भवतीति श्रवणादिसाधनमत्र दर्शितम्।

इत्थञ्च अथ अधिकारप्राप्त्यनन्तरम् अतः = भगवत्प्रसादात् मोक्षप्राप्तेः ब्रह्मजिज्ञासा = ब्रह्मविषयकः विचारः कर्तव्यः इति सूत्रार्थः।

ततश्च किं लक्षणकं तद्ब्रह्मेति चेत् 'जन्माद्यस्य यतः' इत्युक्तम्। यतः = यस्मात्, अस्य = प्रत्यक्षादिप्रमाणसिद्धस्य जगतः, जन्मादि = सृष्टिस्थित्याद्यष्टकं तत् ब्रह्म इति लक्षणमभिहितम्। एतच्च लक्षणं ब्रह्मणः गुणपूर्णत्वस्य उपपादकम्।

एतादृशे जगज्जन्मकारणे ब्रह्मणि किं प्रमाणमिति प्रमाणाकाङ्क्षायाम् उच्यते - शास्त्रयोनित्वात् इति। शास्त्रम् = वेदादिसच्छास्त्रं योनिः = प्रमाणम् अस्येति सूत्रार्थः। अस्तु शास्त्रं प्रमाणम्। वेदादिष्वन्यदपि जगत्कारणत्वेन प्रतीयते इति चेत् - तत्तु समन्वयात्। तदेव

जगत्कारणं नान्यत् कथम्? समन्वयात् = उपक्रमादितात्पर्यलिङ्गात् अवगततात्पर्येण सिद्धत्वात्।

ननु समन्वयः कथम्? यतो वाचो निवर्तन्ते- इतिचेत् तत्समाधये। ईक्षतेर्नाशब्दमिति सूत्रम् आरभ्यते। ईक्षतिविषयत्वात् = ज्ञानविषयत्वात् ब्रह्मणः न शब्दावाच्यत्वम्॥

तदेवं सकलश्रुतिसमन्वयं ब्रह्मणि सम्पाद्य ब्रह्मणः जगत्कारणत्वं तद्द्वारा गुणपरिपूर्णत्वं समर्पितम्। अस्मिन्मते ब्रह्म तु जगतः निमित्त-कारणमेव; स्वतन्त्रः कर्ता; अन्यानि साधनानि तदधीनानि॥

तत्रायं पूर्वपक्षः - विमता सृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रसाधनसापेक्षा सृष्टित्वात् घटसृष्टिवदिति युक्तेः ब्रह्म अन्यसाधनापेक्षमिति न तस्य स्वतन्त्रकर्तृत्वसिद्धिः। एवं पूर्वपक्षे प्राप्ते लोकतः प्राप्तबहु-युक्तिविरोधपरिहारः 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति सप्तभिः सूत्रैः क्रियते। सप्तसूत्रात्मकमिदमधिकरणम्। प्रयोजनञ्च युक्ति-विरोधपरिहार एव ब्रह्मणः स्वतन्त्रकर्तृत्वगुणपूर्णत्वसिद्धिः।

विषयः - जगत्सृष्ट्यादिकम्।
संशयः - तत् ब्रह्म किं स्वतन्त्रसाधनान्तरापेक्षं न वा।
सन्देहबीजम् - लोकदृष्टिः वैदिकवचनञ्च।

इत्थञ्च ब्रह्मणः अन्यस्य स्वतन्त्रस्य साधनस्य सत्त्वप्राप्तौ तन्निरासाय उच्यते - तदन्यत्वम् - स्वतन्त्रकारणस्य नान्यत्वम्, अर्थात् एकमेव स्वतन्त्रं कारणम् इति स्वतन्त्रकारणान्यत्वनिषेधः क्रियते। तत्र हेतुः - आरम्भणशब्दादिभ्यः = आरम्भणशब्दाधिष्ठितश्रुतिवाक्यात्। तच्च

विषयवाक्यम् ऋग्वेदीयदशममण्डलस्य किंस्विदासीदिति मन्त्रः। तत्रायं मन्त्रपाठः -

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ॥१
किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्।
यतो भूमिं जनयन्विश्वकर्मा विद्यामौर्णोन्महिना विश्वचक्षाः ॥२
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥[3]

अत्र श्रुतौ किं स्विद् आरम्भणं किंस्विद् अधिष्ठानम्? इति स्वतन्त्रसाधनस्याक्षेपः। आरभ्यते अनेन इति आरम्भणं करणम्। आक्षेपस्य विपर्यये पर्यवसानात् न किञ्चित् तादृशं साधनं विद्यते इति स्वतन्त्रकारणान्तरसत्त्वं निषिध्यते। तथाच अन्यसाधनसत्वेपि तत्सत्ता भवदधीनैव इत्यतः स्वरूपसामर्थ्यादेव तस्य स्वतन्त्रा सृष्टिः इति सिद्धम्। अत्र आदिपदेन स्वातन्त्र्यादियुक्तिः श्रुतिमूलिका उच्यते। तथा चात्र ब्रह्मणः अन्यस्य स्वतन्त्रसाधनस्य निषेधः सिद्ध इति सिद्धान्तितम्।

परतन्त्रो ह्यपेक्षेत स्वतन्त्रः किमपेक्षते?
साधनानां साधनत्वं यतः किं तस्य साधनैः?[4]

२. युक्त्यन्तरमाह - भावे चोपलब्धेः इति। भावे = स्वतन्त्रसाधनस्य सत्वे, प्रमाणैः उपलभ्येत। न तथा, तस्मात् नास्ति अन्यत् स्वतन्त्रं साधनमिति।

---

[3] ऋग्वेद १०.८१.१ [4] अनुव्याख्यानम्

३. ननु अद्भ्यः सम्भूतः पृथिव्यै रसाच्च इत्यादौ साधनान्यतरस्यापि प्रतीतेः कथं नानुपलब्धिः? इति चेत् तत्राह- सत्वाच्च अवरस्य ॥ अवरस्य=भगवदधीनस्य साधनस्य सत्वान्न तद्विरोध इति समाधानम्।

४. साधनान्तरसत्वमभ्युपेत्य तस्य भगवदधीनत्वं यदुक्तं न तद्युक्तम्। "नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमाऽपरोयत्।"[5] इत्यादिश्रुतौ सर्वस्यान्यस्य असत्वव्यपदेशात्। तथाच साधनान्तरस्यैवाभावे कस्य भगवदधीनत्वम्? तत्रोच्यते - असद्व्यपदेशात् नेति चेत् न। कुतः? धर्मान्तरेण वाक्यशेषात्। तत्र अन्यस्य सर्वस्य असत्वोक्तिः अव्यक्तत्वपरतन्त्रत्वादिधर्मान्तरदृष्ट्या; न तु स्वरूपतः असत्वम् उक्तम्। लोके हि अव्यक्ते सूर्यादौ रात्रौ नास्तीत्येव व्यवहारो दृष्टः।

किञ्च वाक्यशेषात् - वाक्यशेषः तत्र श्रूयते - तम आसीत् इति। ततश्च तमःशब्दोक्तप्रकृतिः तत्र आसीदिति श्रवणात् न सर्वथा परस्य वस्तुनः अभावः इति ॥

५. ननु एतादृशगुरुतरकल्पनापेक्षया साधनाभावकथनमेव उचितम्। साधनशून्यसृष्टिकथने भगवतः महिमाधिक्यलाभात् इति आशङ्कायाम् उक्तम् - युक्तेः इति। साधनाभावे, यद्वा साधनानां भगवद्वशत्वे उभयथापि महिमोत्कर्षः समानः। तथापि साधनसत्वे तेषां साधनत्वमपि भगवदधीनमिति ऐश्वर्याधिक्यमेव इति युक्तत्वात्। "अद्भ्यः सम्भूतः" इत्यादिना साधनसद्भावप्रतीतेश्च तथा अङ्गीकार्यम् ॥

---

[5] ऋग्वेद 10.129.1

६. उक्तार्थे दृष्टान्तमाह - पटवच्चेति। पटसृष्टाविव अत्रापि कर्तृव्यतिरिक्तसाधनानि सन्त्येवेति भावः। तर्हि पटसृष्टौ यथा सदृशसाधनानां स्वातन्त्र्येणैव साधनत्वम् तथा अत्रापि स्यादिति चेत् न तथा। "यथा प्राणादिरिति" तत्र शरीरेन्द्रियादिकं यथा "यः प्राणे तिष्ठन्" इत्यादेः ईश्वरेण अनुप्रविष्टत्वात् न स्वतन्त्रम्। तस्मात् सर्वस्य साधनस्य भगवदनुप्रवेशेनैव सत्तादिकम् इति भगवतः केवलस्य स्वतन्त्रकारणत्वं नान्यस्येति अधिकरणार्थसंक्षेपः।

तदेवं वेदान्तसूत्राणां स्वतन्त्रकर्त्रैक्ये गुणपरिपूर्णे ब्रह्मणि तात्पर्यमिति सिद्धम्॥

**उद्धृतग्रन्थसूची -**


1. ब्रह्मसूत्रमध्वभाष्यम्, अखिलभारतमाध्वमहामण्डलप्रकाशनम्, बङ्गलूरु, 1968
2. सिद्धान्तबिन्दुः, श्री मधुसूदनसरस्वती, चौखम्बाप्रकाशनम्, वाराणसी
3. द्वैतपराण्येव खलु ब्रह्मसूत्राणि, सत्यध्यानतीर्थः, उत्तरादिमठः, बाङ्गलूरु

3

## न्यायदर्शनविकासे कतिपयसंभावनाः

वीरनारायण पाण्डुरङ्गी

### आमुखम्

भारतीयतत्त्वचिन्तनपरंपरायां स्वमात्रासाधारणीं समुच्चां स्थितिम् अवगाहेते प्रमाणतन्त्रं पदतन्त्रं च। तदिदं युगलं पूर्वपश्चिम-मीमांसाभ्यां सह गणितं सत् कर्कशमतिभेद्यां चतुश्शास्त्रीं घटयन्ति भारतीयविद्यासु। अत्रैव च साहितीप्रभृतयः कलाः विमलकोमलधियां विलासभूमिरिव परिगणिता। कुशाग्रशेमुषी-कैकाधिगम्ये इमे शब्दान्वीक्षिकीतन्त्रे अत्यर्थम् अल्पैरक्षरैः गुम्फिते अनेकरहस्यार्थैर्गम्भीरे अध्येतॄणां दुरवगमे प्रसिद्धे। एतादृशि शास्त्रे नदीष्णता न वा अल्पैस्तपोभिरासाद्यते, न च अपरिचरित-सदाचार्यचरणैरर्थयितुं वा शक्यते। अतः खलु विविधेषु विद्याक्षेत्रेषु बहुभिर्विशेषज्ञैराकीर्णेष्वपि शास्त्रीयाः पण्डिताः अङ्गुलिगण्याः द्वित्राः पञ्चषा वा लक्ष्यन्ते। इमानि शास्त्राणि दुर्भेद्यदुर्गाणीव अमितमतिबलनिरपेक्षं सुतरामजय्यानि। शास्त्रेष्वमीषु अहतगतियुता विद्वांसो लोके पुरा गीष्पतिदुरासदं संमाननमासदन्। तादृशाम् एतर्हि पण्डितपरंपरा भीष्मग्रीष्मशोषितसलिला सरिदिव तनुतनूः जिज्ञासून् अलमाप्लावयितुमनलं कदाचित् शान्तं पापं शुशुक्षति।

सेयं चतुस्त्रन्त्री फणिफणितिमणिभिरुज्ज्वलेन व्याकरणशास्त्रेण सदा विहितसदावलम्बना वर्वर्ति। व्याकरणशास्त्रस्यास्य इतरशास्त्रीयेष्वपि यथावसरमनुशासनं सर्वथा सर्वैरङ्गीकार्यम्, अङ्गीक्रियमाणं चेति न केवलं शास्त्रानुशीलिनो विपश्चिदपश्चिमा, अपि तु पाश्चिमा अपि विद्वांसो बोबुधति। विश्वस्मिन् जगत्यस्मिन् समादिमं व्याकरणमिदं पाणिनीयं स्वोदतिकाले अधिभारतमुपभारतं च लोकेषु संस्कृत्रिमया व्यवहरत्सु सर्वादेयमभिनन्दनीयं च, गलति काले प्राकृतभाषासु संस्कृतोद्भूतप्रभावितासु अपि एकोनविंशशताब्द्याम् आङ्ग्लभाषाप्रवेशं यावत् इतरभाषीयैः व्यवहार्यतामधिष्ठिते सर्वसंमान्यमेव ववृते। यद्यपि अधुनातननानाभाषाव्याकरणानामधीत्यां तावत् नेदं व्याकरणं प्राधान्यमश्नुते, तथापि परिचितैतद्व्याकरणसर्वतोमुखसौष्ठवैः भाषाविद्भिः इदानीमप्येतत् सभक्तिश्रद्धं श्लाघ्यते। परमतः पाश्चात्त्यैः भाषाविज्ञैः भाषाशास्त्रं पाणिन्यनुग्रहोपक्रममास्थीयते।

यद्यपि व्याकरणशास्त्रमेव शब्दव्याक्रियानुशासनम् अधीष्टे तथापि कारकार्थनिर्णयः समस्तपदार्थानुगमफक्किका इत्यादयः केचन विषया एतदतिक्रम्य नैयायिकादिरीतिमपि अलन्तरामवगाहन्ते। किंच अर्वाचीनैः नैयायिकैः आकाङ्क्षा-शाब्दबोधादिषु अतिमात्रम् अतिशयितम्। ततश्च षोडशशताब्दीतः व्याकरणं न्यायेन वादावादि समाचरदेव अभ्यवर्धत। महाभाष्य-वाक्यपदीयाभ्यामलं समृद्ध्या लम्भितमिदं शास्त्रं भूषणसार-लघुमञ्जूषादिभिः अर्वाचीनैरपि ग्रन्थैः अलन्तरां प्रमेयपरिशोधने पराक्रान्तिमत् कृतम्।

आदशमशताब्द्याः बौद्धैः, आषोडशशताब्द्याः मीमांसकैः, ततः पुनर्वैयाकरणैः प्रमेयविचारे विरुन्धाना एव नैयायिका स्वशास्त्रमभिवृद्धिं

लम्भयाम्बभूविरे इति प्रसिद्धमेव। नैयायिकानां शाब्दम् अधिकृत्य वैयाकरणैः साकं वाग्युद्धं तत्त्वचिन्तामणितद्व्याख्यानेषु आख्यातवाद-शब्दशक्तिप्रकाशिका-व्युत्पत्तिवादप्रभृतिष्वपि ग्रन्थेषु लक्ष्यमाणमिदं प्रमाणयति यत् परस्परवादविजगीषुभिः विचारप्रवाहः बहुलीकृत इति। इत्थमिदानीमपि शास्त्रगोष्ठीषु नैयायिकानां वैयाकरणानां च वादकेलिः सुदर्शा भवत्येव।

**प्रत्यग्रविचारस्यावश्यकता**

सर्वसंप्रतिपन्नमिदं यत् उत्तरोत्तराभिवृद्धिः नवीनपरानुपज्ञ-विचारपरंपराधीनेति। न हि स्वोपक्रमाभावे केवलं परप्रवर्तनया किमपि वस्तु स्थेमानमधिगच्छति। न्यायव्याकरणविदुषां प्राचां नूत्ननूत्नविचारतुन्दिला वादखेला खलु तान् तच्छास्त्रं मानवीयेतिहासे उच्चैः प्रातिष्ठिपत्। "अति सर्वत्र वर्जयेत्" इति न्यायानुगुणं न्यायशास्त्रे अत्यभिमानः तच्छास्त्रेषु दुर्ज्ञेयत्वारोपश्च तच्छास्त्रकाराणां दुर्विजेयत्वारोपश्च नव्यभव्यचिन्तनधारोपरोधेन अपराध्यति इति निश्चेतुं न विलम्ब्यते केनाप्यमूढेन। नव्यन्यायशास्त्रस्य इतिहा परमन्यथा वरीवृतीति। प्राचीननैयायिकैः शिरसा श्लाघ्यमानाः सिद्धान्ताः सधृति तिरस्कुर्वद्भिः सत्यपराक्रमैः पण्डितैः खलु कारणभूतैः अभावि नव्यन्यायप्रादुर्भावे। वस्तुतः न्यायशास्त्रं स्वरूपत एव युक्तिमवलम्ब्य प्रवर्तते, न तथा अयुक्तिशोधितं शब्दम्। इत्थम् अनन्यादृशं सयुक्तिकनूत्नचिन्तनाय अवकाशदानादिना पण्डितान् उपकुर्वाणं केवलं न्यायशास्त्रं सर्वदर्शनविमर्शने उत्कृष्टतरं राराष्टि। रेखामात्रमपि क्षुण्णात् वर्त्मनः पदम् अव्यतियद्भिः कर्ममीमांसकैः

ब्राह्मैश्च निरायासमेव नव्यन्यायसृष्टमृष्टा भाषा, स्वमतस्थेम्ने कतिपयन्यायराद्धान्ताश्च समाराद्धाः।

उदयन-गङ्गेश-भासर्वज्ञ-वल्लभ-रघुनाथप्रभृतिभिः निजोपक्रममेव सिद्धान्तः पर्यष्कारि। न हि उदयनोदितमेवानूचानेन गङ्गेशेन तत्त्वचिन्तामणिः चिन्तितः, न च तथा रघुनाथेन दीधितिः। अतः खलु समभाणि गदाधरेण "न हि कस्यचित् ग्रन्थकृतो विपरीतलेखनं युक्तिबलात् वस्तुसिद्धौ बाधकम्" इति।

पुराणानामेवाचार्याणां प्रामाणिकत्वे नागेशस्य निराकाङ्क्षा मञ्जूषा न खलु शास्त्रपरंपरयामन्वयं लब्धुमर्हा स्यात्। शंकराचार्यस्यैव ब्रह्मसूत्रेषु एकाधिकारे सति भास्कर-रामानुज-मध्वादीनामाचार्याणां भाष्यप्रणयनवैयग्री सर्वमतेन अस्थाने स्यात्। अन्विताभिधानाभिधानः सिद्धान्तः नास्मन्मतितक्षणे दक्षोऽभविष्यच्चेत् गुरुर्गुरुः शाबरं भाषितमवधूतरूढपरंपरं न व्याख्यास्यत्। इत्थं सर्वत्र शास्त्राणां पुरोगतिः प्रत्यग्रचिन्तनेनैव संभाविनी। गृहान्तरस्थितानां रत्न-कोशानाम् अपरिज्ञानाद्वा ज्ञात्वापि तेषाम् अस्वीकाराद्वा यो हि वराकः साहंकारः स्वगृहमात्रं रत्नैकभाण्डागारं मन्यते, तस्य पुत्रपौत्रादय एव परगृहस्थरत्नलालसया तं परित्यजन्ति उपहसन्ति च।

गदाधरं नागेशं वा विधवितुं नापेक्ष्यते अतिमानुषः पाण्डित्यप्रकर्षः। कालो ह्ययं निरवधिरेव प्रसूतपदार्थपरीक्षणे निष्पक्षः निर्णेता। न तु तात्कालिकी आलोचकालोचितयोः विद्वत्सु प्रतिष्ठा। आलोचनस्य मिथ्याग्रहग्रस्तत्वे पण्डिताः स्वयं तत् तृणाय मन्येरन्। "मयि जीवति सति कथं गदाधरस्य नागेशस्य वा निरसनप्रयासः"

इत्याद्यालापविलापाः गदाधरार्यस्य निरुपाधिकभक्तानामेव शोभन्ते, न पुनः परीक्षकाणाम्। तथा कथयन्तः “मूर्खश्च मकरश्चैव गृहीतग्राहिणावुभौ” इत्युक्तेः निदर्शनभूताः किं न भवेयुः। तथा च कथनं दुरभिनिवेशप्रकटनमात्रं वा किं न स्यात्। न वयं वाञ्छामो नव्ययुक्तीः प्रदर्शयन्तः जरद्ग्रन्थभक्तान् पण्डितान् न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् इत्युक्तेर्विषयीकर्तुम्।

यदि कापि विद्याशाला प्राचीनैरेव ग्रन्थैः पाठ्यांशान् पूरयित्वा तुष्यति नूतनविकासं चावरुन्धे तर्हि सा निष्प्राणवस्तुशालेव, तत्रत्याश्चाध्यापकाः निष्प्राणदेहप्रसाधनपराः इव लक्ष्येरन्।

अतः एतावता सिद्धं यत् नवीनचिन्तनमेव शास्त्राभिवृद्धिहेतुः। एतदभावेनैव उभे इमे शास्त्रे तथान्यान्यपि शास्त्राणि क्षीयन्ते अद्य। अद्य अधीयानाः ग्रन्थाः तिसृभ्यः शताब्दीभ्यः ततोपि वा पूर्वं विरचिताः। ततः परं मन्त्रवशितभोगीव, उपरक्तभानुमानिव, दिवसधूसरशशीव शप्त इव पण्डितानां प्रातिभप्रभाव मलिनः कुण्ठितः पङ्गुः अन्धश्च संजातः। यद्यपि बहूनि क्रोडपत्राणि एतच्छतकीयानि उपलभ्यन्ते तथापि तेषु महता श्रमेण अन्विष्यैव नूतनप्रमेयं वा नूतना शैली वा प्राप्येत। प्रायः सर्वाणि तानि गदाधरजगदीशादीनां प्राचामेव मतस्य उपोद्बलिषया शोधरूपाणि समर्थनपराणि च निबद्धानि। न तु मनागपि स्वीययुक्तिनिकषधृष्टतत्त्वप्रकाशनपराणि।

शतं वर्षाणि यावत् वयं न्यायशास्त्रे समानान्येव संस्करणानि रटामः। शोधस्यापि सैव गतिः। प्रत्यग्रता क्वचिदेव प्रदर्शिता। एतादृशे पर्युषिते अध्यापने ऋषिकुलसंभूतानां भारतीयानां बुद्धेः व्यापृतिः

चन्दनकाष्ठस्य इन्धनकरणमिव, कल्पलतया कूपरज्जुनिर्माणमिव सत्यं वर्तते।

अधुना शास्त्रेषु परस्परं वादविवादसंवादाः शनैः शनैः दृशामभूमिं लप्स्यन्त इव इति भाति। समेषामेव शास्त्राणामेतादृशीं दशां प्रति कतिचिदत्र हेतवः अक्षिलक्ष्यीभवन्ति।

तेषु प्रमुखं कारणद्वयं तावत् स्वकीयशास्त्रे अन्यशास्त्रेषु वा क्षोदक्षमाक्षेपाभावः, आधुनिकविद्वदुद्भाविताक्षेपेष्वौदासीन्यं च। अतः शास्त्रप्रवाहोयमहर्दिवं शोषमुपैति। तत्प्रतीकारश्च शास्त्रेषु नूतनाक्षेपापादनं, तत्समाधानं; शास्त्रेषु अन्तर्विरोधोद्भावनम्, तत्प्रतीकारः; बाह्योद्भावितदूषणमोषणम् इत्येतैरेव साध्यम्। किंचाधुनातनाः नैयायिकाः वैयाकरणाश्च ग्रन्थारूढेभ्यः नूतनाक्षेपेभ्यः, तथा आधुनिकदर्शनशास्त्रविशेषज्ञैश्च उत्थापितेभ्यः आन्यपर्यमेवावलम्बमाना दृश्यन्ते। उदासीनताकारणं च शास्त्रेषु एकवाक्यता-समुचितदिग्दर्शनयोरभाव एव।

संप्रतिपत्तव्यमिदं यत् यः पुरुषः केवलमेकस्मिन्नेव शास्त्रे श्रद्धातिशयमाधत्ते तस्य कूपमण्डूकगतिः भवति। उक्तं चारिन्दमचक्रवर्तिमहाशयेन "यो हि वराकः साहंकारः स्वगृहमात्रं रत्नैकभाण्डागारं मन्यते, तस्य पुत्रपौत्रादय एव परगृहस्थरत्नलालसया तं परित्यजन्ति उपहसन्ति च" इति। यथैव शास्त्रेषु गहना गभीरा च अधीतिरावश्यकी (depth) तथैव शास्त्रान्तराणामपि सम्यक्परिचयः तदीयगुणदोषचिन्तनं चावश्यापेक्षितम्। केवलं यः एकस्मिन्नेव भागे शास्त्रे च क्वचिद्गहनां गतिमाप्नोति सः अल्पदेशव्यापी योजनगहनकूप

इति न तादृशीं शोभामाप्नोति यादृशीं शोभां योजनविस्तीर्णं सरः आधत्ते। तस्मात् शास्त्रोपासकैः गहनैः विस्तृतैश्च भाव्यम्।

1. तत्र प्रायः शतद्वयीं यावत् क्रोडपत्रताण्डवेन अतिधूसरितमूलग्रन्थाध्ययनं नास्तीति नूतनप्रमेयाचिन्तने कारणम्। यद्यपि क्रोडपत्राणि तावत् नितान्तमेव बुद्ध्यतिशयमादधतीति सत्यं, तथापि न तेषां प्रमेयशोधने उपयोगबाहुल्यं, परिष्कारशोधनपरत्वात्तेषाम्। तथाच गदाधरजगदीशगोलोकभट्टरामशास्त्र्यादिविदुषां नवीनग्रन्थान्विहाय पुनरेव न्यायभाष्यवार्तिकादिषु, किरणावल्यादिग्रन्थेषु आपादतलं च दीधित्यादिसहितमणिग्रन्थे च अधीतेषु नूनमेव प्रमेयविचारे महानालम्बः संप्राप्स्यते।

2. किंच प्राच्यग्रन्थस्थान् युक्त्यादिविरुद्धविचारान् कियन्तं यावत्कालं तथैवानुवर्तितुं शक्नुमः इत्यत्र जागरूकैर्भाव्यम्। "पुराणमित्येव न साधु सर्वम्" इत्युक्तरीत्या नवीनापि युक्तिसिद्धा विचाराः आदरणीया एव। तेषु च केचन यथा पारिमाण्डल्यादीनां कारणत्वाभावसिद्धान्तः भाष्याद्यपरिशीलनमूलकः, नित्यद्रव्यस्यानाश्रितत्वसिद्धान्तोपि तथा, आकाशस्य श्रोत्रत्वमिति च तर्कविरुद्धो विचारः, नासाग्रवर्ति घ्राणमित्यनाधारः सिद्धान्तः, चक्षुःश्रोत्रयोः प्राप्यकारित्वसिद्धान्तः, जन्यमात्रस्य कालोपाधित्वसिद्धान्तः, चार्वाकाणां प्रत्यक्षमात्रप्रमाणकत्वप्रवादः इत्यादयः। युक्तिविरुद्धान् एतान्विहाय नव्याभिर्युक्तिभिः सर्वथा नूतनामेव गतिमाप्नुमः।

3. आधुनिकविज्ञानेन स्पर्धयाच नूनमेव शास्त्राभिवृद्धिः इति। आत्मास्तित्वादिविषये प्राच्योक्तयुक्तीः अपहासेन दूरीकुर्वतो

वैज्ञानिकान् प्रत्याययितुं केचन मार्गा अन्वेषणीयाः। यथा "प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्", "वीतरागजन्मादर्शनात्" इत्यादिसूत्रैः शिशोः स्तन्यपानादिना प्राक्तनजन्मादिकं सिध्यतीति प्राचामाशयः अयुक्तः, मनुष्यशरीरगतजीवकोशैरेव तदुपपत्तेः इति वैज्ञानिकाः। यद्यपि जातिस्मरादिकं च कथमपि नोपपादयितुं शक्तास्ते, तथापि प्राचीनयुक्तिरपि समर्थनीयैव।

4. एतदुद्देश्यपरिपालनार्थं नूतनानां प्राच्यानां वा सारग्रन्थानामेव पाठनादिषु नियोगः। तदर्थं नूतनानां पाठ्यग्रन्थानां निर्माणं चावश्यकतरमेव, यानि च पाठ्यपुस्तकानि विषयाधृतानि भवेयुः (content based) नतु पङ्क्त्याधारेण (not text based)। परिष्कारादिपद्धतिज्ञानार्थं व्युत्पत्तिप्राप्त्यर्थं च पृथगेव प्रणालीग्रन्थः रचनीयः यस्यैकस्य पठनेनैव प्रायः परिष्कार-अनुगमादिकं सुगमं भवेत्, स्वैरं च गतिर्भवेत्।

5. पाश्चात्त्यदर्शनशास्त्राणामपि अस्मदीयपाठ्यक्रमे विनियोगः करणीयः, तावतापि तदुक्तयुक्तिभिः सह युद्धेन नूतनतथ्यानाम् आविष्करणं भवेत्।

6. एतद्रीत्या अधिकाधिकपठनाय योस्मदीयानां पाठ्यक्रमः सः पञ्चवर्षात्मकः अतीव न्यूनः सम्यक्पाण्डित्यसंपादने। पाठ्यक्रमाणामाधिक्यसंपादनार्थं समयावधिरपि वर्धनीयो भवति।

तदेवं परिपालने किंचिदिव नूतनपथपरिवहनं शास्त्राणां भवतीति संभाव्यते।

तेषां च कतिपयशोधपरियोजनानां बिन्दुमात्रेण निर्देश एवं भवति-

1. वैशेषिकसिद्धान्तानां गणितीयपद्धत्या विमर्शः संपूर्णानन्द संस्कृत विश्वविद्यालयः ।
2. वैशेषिकसिद्धान्त का पद्धतिमूलक विमर्श विश्वंभर पाहि ।
3. आधुनिकप्रतीच्यदार्शनिकैस्साकं संवादेन नूनततथ्यानामाविष्कारः । यथा रसेलमहाशयस्य प्रोपोसिषन् विषयमधिकृत्य विचारगोष्ठी आयोजिता पुणेनगरे ।
4. पुनर्जन्मादिविषये जीन् इत्यादिनूतनविषयानधिकृत्य आधुनिकजीवविज्ञानेन सह विमर्शः ।
5. प्रमाणशास्त्रविषये ज्ञानादिनूतनविषयानधिकृत्य आधुनिकजीवविज्ञानेन सह विमर्शः । यथा निर्विकल्पकादिविषये ।
6. आचार्यनवज्योतिसिंहादिरचिताः नव्यवैशेषिकपदार्थाः क्रमादयः ।
7. यथा आधुनिकतर्कशास्त्रशिक्षणं, तथैव आधुनिकपद्धत्यनुसारेण प्रौढशालासु न्यायशास्त्रीयपदार्थशिक्षणम् यथा वि.एन्.झा महाशयस्य प्रयत्नाः ।
8. नव्यन्यायाधारितगणकयन्त्रीयतन्त्रांशनिर्माणम् यथा ऐ.ऐ.ऐ.टि हैदराबादादिसंस्थासु कृतमस्ति ।

# 3

## स्थानिवत्सूत्रार्थविमर्शः

स्वामी जपसिद्धानन्दः

**लक्ष्यम्**- "स्थानिवत्सूत्रार्थविमर्शः" इत्यस्य निबन्धस्य लक्ष्यं तावत् "स्थानिवदादेशोऽनल्विधौ" इति सूत्रस्य यथासामर्थ्यम् अध्ययनम्, अधीतार्थस्य सरलम् उपस्थापनं च।

**शोधप्रविधिः**- अत्र सूत्रसङ्ख्योल्लेखे आदावष्टाध्याय्याः पुनः सिद्धान्त-कौमुद्याश्च क्रमिकसङ्ख्या दर्शिता। मध्येनिबन्धमुदाहृतौ आश्रित-ग्रन्थावलौ च एम्.एल्.ए पद्धतिः संस्कृतोचितविपरिणामैः संश्रिता। परिभाषादिसङ्ख्यापि निवेशिता अध्येतॄणामञ्जसा बोधाय।

**उपक्रमः**

श्रीमद्वेदपुरुषस्य मुखस्थानीयं पदशास्त्रम्। तत्र पाणिनीयं श्रेष्ठम्। शास्ति हि शब्दान् लोके वेदे च। धर्मसाधनत्वञ्चास्य महत्त्वे हेतुः इति साम्प्रदायिकाः। साम्प्रतिकास्तु संवीक्ष्य सङ्गणकयन्त्रमित्रत्वम् अस्य पारम्यं जेगीयन्ते। पाणिनीयाष्टके षाड्विध्यं सूत्राणां विदितचरम्। अतिदेशः तत्र अन्यतमः प्रकारः। स्थानिवत्सूत्रम् अतिदेशेषु प्रधानम्। सूत्रस्य पूर्णं स्वरूपम् "स्थानिवदादेशोऽनल्विधौ" इति। प्रथमाध्यायस्य प्रथमपादे षट्पञ्चाशं सूत्रम् इदं समग्रं शब्दशास्त्रम् अधिकुरुते। आ बहोः कालात् पण्डिताः अस्य पर्यालोचने व्यापारयन्तः आत्मानं धन्यम् अमन्यन्त।

योगोऽयं लोकात् शास्त्रतश्च सिद्धः इत्यादिः आक्षेपः महाभाष्यकृता भगवता पतञ्जलिना समर्थं समाधायि। लक्ष्यैकचक्षुष्केण तेन सूक्ष्मेक्षिकया सूत्रपद-सार्थक्य-विमर्शः विहितः। अपिच अध्येतृ-मत्युत्तेजनाय क्वचित् सूत्रं सयुक्ति प्रत्याख्यायि। प्रकृतसूत्रे स्थानि-वदादेशः इत्यंशस्य प्रयोजनं सुविचार्य अन्त्ये स्पष्टप्रतिपत्त्यर्थः, उत्तरत्र अनुवृत्त्यर्थश्च इति दर्शितम्। न च तेन शास्त्रस्य अनुपादेयता आशङ्क्या सूत्रभङ्गप्रसङ्गः वा। "वृद्धिरादैच्"१.१.१/१६ इत्यत्र भाष्योक्तं स्मरणीयं- "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेन अप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेणे"ति।[1] तथैव "इको यणचि"६.१.७७ इत्यत्र सिद्धान्तितञ्च "सामर्थ्ययोगान्न च किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यादि"ति[2] एवम्भूतं भाष्य-वचनं श्रद्दधानैः समग्रमेव शास्त्रं समादरणीयमिति शिष्टसम्मतं मतम्।

**सूत्रगतपदानां व्युत्पत्तिः**

त्रिपदात्मकेऽस्मिन् सूत्रे स्थानिवत् आदेशः अनल्विधौ इति पदच्छेदः। स्थानिवदित्यव्ययम्। आदेशः इति पुँल्लिङ्गप्रथमैक-वचनान्तम्। अनल्विधौ इति पुँल्लिङ्गसप्तम्येकवचनान्तम्।

**स्थानम्** - अत्र सूत्रे भावसाधनः स्थानशब्दः। ष्ठा गतिनिवृत्तौ इत्यस्माद् भौवादिकात् धातोः अकर्मकात् अनिटः परस्मैपदिनः स्थितिः इत्यर्थे "भावे" ३.३.१८ इत्यधिकारपठितेन "ल्युट् च"

[1] शास्त्री भार्गवः। भागः१, पृ.१६० [2] शास्त्री भार्गवः। भागः५, पृ.७८।

३.३.११५ इत्यनेन ल्युट्प्रत्यये स्थानम् इति। "भावे ल्युडन्तः"[3] इति लिङ्गानुशासनेन भावल्युटा निष्पन्नः स्थानशब्दः क्लीबः।

अत्र विषये कैयटोक्तमनुसन्धेयम्। "षष्ठीस्थाने योगा" १.१.४९/३८ इत्यत्र अन्येषां मतमनूद्य उररीकरोति- "अन्ये त्वाहुः- भ्रस्जो रोपधयो रमन्यतरस्याम् ६.४.४७/२५३५ – भ्रस्जः रेफस्य उपधायाश्च स्थाने रमागमो वा स्याद् आर्धधातुके।[4] इत्यादौ रोपधादीनाम् आनर्थक्याद् भावसाधनः प्रसङ्गवाची स्थानशब्दः आश्रीयते। तेन अस्तेः प्रसङ्गे- अस्तेः प्राप्तौ भूः प्रयुज्यते इत्यर्थः संपद्यते। स्वाभाविको अस्तेरप्रयोगः आर्धधातुके भूशब्दस्य च प्रयोगः अनेन प्रकारेण अन्वाख्यायते" इति॥[5] तत्रैव उद्योतकृताऽपि अद्योति - "शब्दनित्यत्वभङ्गापत्त्या स्थानशब्दो निवृत्तिवाची नोपपद्यते इति भावः" इति॥[6] सर्वोऽप्ययमर्थः अस्मिन्नपि सूत्रे उपादेयः।

**स्थानी** - स्थानम् अस्य वर्णस्य (शब्दस्य वा) अस्ति इत्यर्थे "अत इनिठनौ" ५.२.११५/१९२२ इति सूत्रेण इनिप्रत्यये स्थानिन् इति रूपम्। स्थानिन् इत्यस्य स्थितिमान् इत्यर्थः। स्थितिमान् प्रसङ्गवान्। कीदृशः प्रसङ्गविशेषः अत्र शास्त्रे ग्राह्यः इति विषये शास्त्रज्ञैः प्रौढ्या पर्यालोचितम्। ततः निदर्शनमुद्रया पश्चात् किञ्चित् प्रस्तूयते सचित्रं प्रदर्श्यते च। स्थानी इत्यत्र वर्णविशेषणत्व-निबन्धनं पुंस्त्वम्। "अन्यः स्थानी, अन्यः आदेशः।"[7] इत्यादिभाष्यप्रयोगाच्च।

[3] झा, नरेश। सू. ११९, पृ.४५ [4] (शर्मा, गिरिधरः। भागः३, पृ.३५०) [5] शास्त्री, भार्गवः। भागः१, पृ. ४०८
[6] शास्त्री, भार्गवः। भागः१, पृ.पृ. ४०८-४०९ [7] शास्त्री, भा। भागः१, पृ.४४५

**स्थानिवत्** - स्थानिना तुल्यं कार्यं प्राप्नोति इत्यर्थे "तेन तुल्यं क्रिया चेद्वतिः" ५.१.११५ इति वतिप्रत्यये स्थानिवदिति रूपम्। तस्य "तद्धितश्चासर्वविभक्तिः"१.१.३८ इति सूत्रेण अव्ययसंज्ञा। तेनतुल्यंसूत्रे 'तेन' इत्यत्र "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्" २.३.७२ इत्यनेन तृतीया। तृतीयान्ताद् वतिः यत्र सूत्रे निर्दिश्यते तत्र प्रायेण तत्स्थानिककार्याणि, तन्निमित्तककार्याणि च अतिदिश्यन्ते। अत्र स्थानिशब्दः तत्कर्तृककार्यप्राप्तौ लक्षणया वर्तते। ततः स्थानिवत् इत्यस्य स्थानि-कर्तृक-कार्य-प्राप्ति-तुल्या कार्यप्राप्तिः इत्यर्थः। अतः आदेशः स्थानिवदित्यस्यार्थः स्थानि-कर्तृक-कार्य-प्राप्ति-तुल्य-कार्य-प्राप्तिमानादेशः इति फलति।

**आदेशः** - आङ्पूर्वकात् दिश अतिसर्जने इति धातोः तौदादिकात् सकर्मकात् अनिटः उभयपदिनः आदिश्यते असौ इत्यर्थे "अकर्तरि च कारके संज्ञायाम्"(३.३.१९) इत्यनेन कर्मणि घञि आदेश इति रूपम्। "घञबन्तः"[8] इति लिङ्गानुशासनात् पुंस्त्वम्। आदेशः आद्योच्चारणरूपेषु उपदेशप्रकारेषु अन्यतमः। सः द्विधा - भावरूपः, अभावरूपश्च। भावरूपः "अस्तेर्भूः" (२.४.५२) इत्यादिभिः सूत्रैः धात्वादेशः, "किमः कः" (७.२.१०३) इत्यादिभिः अङ्गादेशः, "ठस्येकः" (७.३.५०) इत्यादिभिः प्रत्ययादेशः, "बहुवचनस्य वस्नसौ" (८.१.२१) इत्यादिभिः पदादेशः इत्येवं बहुप्रकाराः भावरूपादेशाः। अभावरूपः "सुपो धातुप्रातिपदिकयोः" (२.४.७१) इत्यादिभिः लुगादेशः, "जुहोत्यादिभ्यः श्लुः" (२.४.७५) इति श्लुवादेशः, "जनपदे लुप्" (४.२.८१) इत्यादिभिः लुबादेशः,

[8] झा, नरेश। सू.३६, पृ.२२

"लोपो व्योर्वलि" (६.१.६६) इत्यादिभिः लोपादेशः। पुनश्च आदेशः द्विप्रकारः - प्रत्यक्षः आनुमानिकश्चेति। प्रत्यक्षः "एरुः" (३.४.८६) इत्यादिः, आनुमानिकः 'तेस्तुः' इत्यादिः। अस्मिन् सूत्रे आदेशपदेन सर्वेषाम् आदेशानां सङ्ग्रहः।

**अलाश्रयः** - अलमाश्रयते अलाश्रयः। अल् इति वर्णवाची। माहेश्वरसूत्रेषु सर्ववर्णग्राहकः "अल्" इति प्रत्याहारः। प्रत्याहाराणां तदन्तःपतितेषु वर्णेषु एव शक्तिः, समूहे शक्तिः नाङ्गीक्रियते प्रयोजनाभावात्। आङ्पूर्वकात् श्रिञ् सेवायाम् इति धातोः भौवादिकात् सकर्मकात् सेटः उभयपदिनः अलम् आश्रयते इत्यर्थे पचादेराकृतिगणत्वात् "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३.१.१३४) इत्यनेन अच्प्रत्यये अलाश्रयः इति रूपम्। "घाजन्तश्च"[9] इति पुंस्त्वम्। अलाश्रयः इत्युक्ते वर्णम् आश्रितः (विधिः) इत्यर्थः। अलाश्रयो विधिः इति करिष्यमाणे समासे पुँल्लिङ्गविधिशब्दस्य विशेष्यत्वात्, तत्र विशेषणभूतः अलाश्रयशब्दः अपि पुँल्लिङ्गः। अयं विग्रहः भाष्यानुरोधी। कैयटस्यु "एरच्" (३.३.५६) इत्यनेन कर्मार्थे अच्-प्रत्ययं कृत्वा आश्रयशब्दं व्युत्पाद्य, अल् आश्रयः यस्य सः अलाश्रयः इति बहुव्रीहिसमासेन रूपं व्यधात्।

**अनल्विधौ** - विधीयते इति विधिः। विपूर्वकात् डुधाञ् धारणपोषणयोः इति धातोः आदादिकात्सकर्मकादनिटः उभयपदिनः आकारान्तात् "उपसर्गे घोः किः" (३.३.९२) इति सूत्रेण कर्मणि अर्थे किप्रत्यये विधिः इति रूपम्। "क्यन्तो घुः"[10] इति लिङ्गानुशासनात्

[9] झा, नरेश। पृ.३७ [10] झा, नरेशः। सू.४१, पृ.२३

पुंस्त्वम् । अलाश्रयो विधिः अल्विधिः । "विशेषणं विशेष्येण बहुलम्" (२.१.५७) इत्यनेन कर्मधारयसमासे, "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योप-सङ्ख्यानम्" इति वार्त्तिकेन आश्रयशपदसेय लोपे अल्विधिः इति रूपम् । अल्विधिः इत्युक्ते वर्णाश्रितं कार्यम् इति अर्थः । न अल्विधिः अनल्विधिः, तस्मिन् अनल्विधौ इति रूपम् । "परवल्लिंङ्गं द्वन्द्वतत्पुरुषयोः" (२.४.२६) इति सूत्रेण अनल्विधिः इति पुँल्लिङ्गः शब्दः । अत्र सप्तमी वैषयिकी, नञ् प्रसज्यः ।

**सूत्रस्य सरलार्थः**

"स्थानिवदादेशोऽनल्विधौ"(१.१.५६) इत्यत्र द्वौ भागौ स्थानिवदादेश इति विध्यात्मकः, 'अनल्विधौ' इति निषेधरूपश्च । वैयाकरण-सिद्धान्तकौमुदौ भट्टोजिदीक्षितेन इत्थं व्यधायि "आदेशः स्थानिवत् स्यात्, नतु स्थान्यलाश्रयविधौ" इति । प्रौढग्रन्थेषु भाष्यपर्यन्तमधीत्य समग्रं सूत्रार्थमधिगम्य एतद्वाक्यं पुनः पठ्यते चेत् वृत्तेर्महत्त्वं गम्येत । दीक्षितमहाभागस्य वृत्तयः प्रायेण भाष्यार्थसाराभिषवरूपाः । सूत्रकल्पानि तद्वृत्तिवाक्यानि अध्येतारः अनुसन्देधीयेरन् ।

**विध्यंशः** - सूत्रे 'स्थानिवदादेश' इति विध्यंशः । 'आदेशः स्थानि-तुल्यो भवती'ति तदर्थः । स्थानिनि विद्यमानाः कार्यप्रवृत्तिप्रयोजकाः धर्माः आदेशे अतिदेष्टव्याः इति यावत् । ततः निमित्त- सद्भावात् तत्तच्छास्त्रेण कार्यं प्राप्यते इति सिद्धान्तः । किंविधः आदेशः स्थानिवत् स्यात्? धात्वादेशः, अङ्गादेशः, लोपादेशः इत्येवं सर्वोऽपि आदेशः स्थानिवत् स्यात् । आदेशः प्रत्यक्षानुमानिकभिदा पुनर्द्विधा । तयोरपि अत्र सङ्ग्रहः । यत्र यत्र स्थानिवद्भावेन प्रयोगः निर्वोढव्यः तत्र सर्वत्र आदेशः स्थानितुल्यः आपादनीय

इत्यभिप्रायः। आदेशमात्रं यथा स्थानिवत्स्यादिति आशयेन एव सामान्यवचनं दीक्षितवृत्तौ 'आदेशः स्थानिवत् स्यादि'ति।

**निषेधांशः** - अनल्विधौ इतीदं बह्वर्थसमर्थं पदम्। सूत्रे अयं निषेधात्मकः भागः, नञः प्रसज्यत्वात्। "प्रसज्यस्तु निषेधकृत्" इत्युक्तम्। तथाच तल्लक्षणम् - "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधौऽसौ क्रियया सह यत्र नञ्॥" (झळकीकर। पृ.५८४) इति॥ "निषेधाश्च वरीयांसः" (शास्त्री, सदाशिव। प.शे.। परिभा.१२१, पृ.२६३) इति न्यायेन अनल्विधौ इत्येतत् अस्मिन् सूत्रे अतिशयप्राधान्यम् आवहति। अनल्विधपदस्य अर्थग्रहणम् अन्तरा स्थानिवद्भावः क्व भवति क्व न इति निर्णेतुं न शक्यते। स्थानिवद्भावनिश्चयम् विना सूत्रान्ताराणां प्रवृत्तौ सन्देदिह्यते मनः। अतः अनल्विधिपदार्थः सुष्ठु अवगन्तव्यः। अनल्विधौ इत्यस्य 'अल्विधिविषके कार्ये कर्तव्ये आदेशः स्थानिना तुल्यः न भवति' इत्यर्थः। स्थानिगतधर्मान् आदेशः न प्राप्नोति इति यावत्। एवं च - 'आदेशः स्थानिधर्मान् लभते, अलाश्रिते कार्ये कर्तव्ये तु न लभते' इति फलितार्थः। तदुक्तं दीक्षितवृत्तौ - 'न तु स्थान्यलाश्रयविधौ' इति।

**स्थानपदार्थः**

**प्रसङ्गशब्दार्थः** - स्थानं प्रसङ्गः इत्युक्तम्। कः प्रसङ्गः? उच्चारणस्य अवसररूपः प्रसङ्गः। कस्य उच्चारणम्? वर्णानां शब्दानां वा। ते च द्विविधाः प्रसक्ताः आदिश्यमानाश्च। यः पूर्वतः सिद्धः सः प्रसक्तः। प्रसक्तस्य स्थाने यः अन्यः अभूतपूर्वः विधीयते सः आदेशः। तदुक्तं भाष्ये - "स्थानी हि नाम – यो भूत्वा न भवति। आदेशो हि नाम

योऽभूत्वा भवति" (शास्त्री, भार्गवः। भागः१, पृ. ४५३) इति। एवञ्च उच्चारणावसररूपः प्रसङ्गः यस्य अस्ति सः स्थानी।

सुधीभिः उपास्यः (हरिः) इति समासे संहितायाः नित्यत्वात् सुब्लुकि 'सुधी उपास्य' इत्यवस्थायामीकारः प्रसक्तः, पूर्वतः सिद्धः, यकारः आदेशरूपः अभूतपूर्वः। प्रसङ्गः उभाभ्यां सम्बध्नाति। 'सुधी+उपास्य' इत्यत्र ईकारयकारयोः उच्चारणस्य अवसरः। उभयोः उच्चारणविषयीभूतः प्रसङ्गः। स एव प्रसङ्गः स्थानशब्देन व्यपदिश्यते। एवम्भूतप्रसङ्गवान् स्थानी। अयं सरलः बालोपयोग्यर्थः। नानेन समतोतुष्यन्त दोषज्ञाः। स्थानपदार्थं परिचिकीर्षन्तः पण्डिताः तदर्थानुसन्धानमनुवर्त-याञ्चक्रुः। स्थानपदस्य लक्षणं द्रढिष्ठम् आपिपादयिषन्तः नव्यन्यायभाषाप्रवाहाधिरूढं चिन्तनं प्रवर्तयामासुः। शास्त्रार्थ-रत्नावल्यादौ ग्रन्थे सूत्रस्यास्य अर्थनिष्कर्षार्थमास्थितः प्रयत्नातिशयः वैदुष्यम् अधिजिगमिषुभिः आत्मसात्चिकीर्षितव्यः। प्रौढविचाराः ते तत्रैव ग्रन्थेषु द्रष्टव्याः। निदर्शनार्थमत्रात्यल्पं प्रस्तूयते।

स्थाने प्रसङ्गे साधुशब्दविषणी बुद्धिः असाधुशब्दविषयिणी बुद्धिश्च प्रवर्तते। शास्त्रम् असाधुशब्दविषयिणीं बुद्धिं संहृत्य साधुशब्दविषयिणीं प्रवर्तयति। ततः साधुशब्दप्रयोगो भवति इत्ययं सामान्यतः क्रमः शब्दानुशासनस्य। 'सुधी उपास्य' इत्यत्र "इको यणचि" (६.१.७७/४७) इति सूत्रेण ज्ञानद्वयं बोध्यते - इकारोच्चारणम् असाधु, यकारोच्चारणं च साधु इति। तत्र प्रथमं ज्ञानं भ्रमः, द्वितीयं प्रमा। भ्रमविषयः न प्रवृत्तिजनकः। अतः सुधीउपास्य इत्यस्य भ्रमविषयत्वात् तादृशप्रयोगकरणे

प्रेक्षावतां प्रवृत्तिः न स्यात्। भ्रमात्मकज्ञानबोधने इदम् एव फलम्। ततः प्रमात्मकज्ञानविषये प्रवृत्तिः भवति, सुध्युपास्य इति कृतसन्धिः प्रयुज्यते। एवञ्च 'सुधी उपास्य' इत्यत्र "इको यणचि" (६.१.७७/४७) इति शास्त्रं द्विविधं ज्ञानं बोधयति -

1. अजव्यवहितपूर्वत्वविशिष्ट-इक्कर्मकोच्चारणं साधु इति ज्ञानं भ्रमः।

2. अजव्यवहितपूर्वत्वविशिष्ट-यण्कर्मकोच्चारणं साध्विति ज्ञानं प्रमा।

**भ्रमनिरूपणम्**

प्रथमं यद् भ्रमात्मकं ज्ञानं तस्य एवं विश्लषणम्- **साधुत्वप्रकारक-भ्रमात्मक-ज्ञानीय-विशेष्यतावत् अजव्यवहितपूर्वत्व-विशिष्ट-इक्क-र्मकोच्चारणम्** इति। इदं प्रथम-ज्ञानस्य स्वरूपम्। (वत्प्रत्ययात् पुर्वं विशेषणं तदुत्तरं विशेष्यम् इति विवेकः।) एवञ्च अस्मिन् ज्ञाने -

1. विशेष्यदलम् - अजव्यवहितपूर्वत्वविशिष्ट-इक्कर्मकोच्चारणम्

2. प्रकारदलम् - साधुत्वप्रकारकभ्रमात्मकज्ञानीय-विशेष्यता

विशेष्यदले इक्कर्मकोच्चारणमित्यत्र विशेष्यम्- उच्चारणम्। विशेष्ये विशेष्यता वर्तते। विशेष्यतायाः अवच्छेदकम् उच्चारणत्वम्। उच्चारणनिष्ठ-विशेष्यतायाः अवच्छेदकम् इक्, कर्मत्वं च। विशेष्ये विशेष्यता अपि अवच्छेदकं भवति, अतः उच्चारणत्वम् अपि विशेष्यतावच्छेदकम् एव। उच्चारणनिष्ठा उच्चारणत्वावच्छिन्ना विशेष्यता त्रिभिः निरूपिता भवति -

1. इग्-निष्ठावच्छेदकता-निरूपिता

2. कर्मत्व-निष्ठावच्छेदकता-निरूपिता

3. प्रकारता-निरूपिता (प्रकारदलं नीचैः दत्तम्)

प्रकारदले- प्रकारः साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यता। तद-वच्छेदकः- साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यतात्वम्। पूर्वोक्त-विशेष्यतायाः इदमप्यवच्छेदकम्। अतः सा विशेष्यता साधुत्व-प्रकारक-भ्रमात्मकज्ञानीय-विशेष्यतात्वावच्छिन्न-प्रकारतानिरूपितापि भवति। उच्चारणनिष्ठविशेष्यतायां विशेष्यविशेषणदलयोः समावेशः इग्-निष्ठावच्छेदकता-निरूपित-कर्मत्व-निष्ठावच्छेदकता-निरूपिता उच्चारणत्वावच्छिन्ना उच्चारणनिष्ठा या, साधुत्व-प्रकारक-भ्रमात्मक-ज्ञानीय-विशेष्यता-त्वावच्छिन्न-प्रकारता-निरूपिता विशेष्यता।

अयं स्थानपदार्थस्य प्रथमभागः। एवञ्च लक्षणस्य पूर्वार्धम् - "अवच्छेदकता-निरूपिता-वच्छेदकता-निरूपितोच्चारणत्वावच्छिन्नो-च्चारणनिष्ठा या, साधुत्व-प्रकारक-भ्रमात्मक-ज्ञानीय-विशेष्यतात्वा-वच्छिन्न-प्रकारता-निरूपिता विशेष्यता" इति।

**प्रमानिरूपणम्**

द्वितीयं यत् प्रमात्मकं ज्ञानम्- "अजव्यवहितपूर्वत्वविशिष्टयण्कर्मको-च्चारणं साधु" इति, तस्य विश्लेषणन्तु साधुत्वप्रकारक-प्रमात्मक-ज्ञानीय-विशेष्यतावत् अजव्यवहित-पूर्वत्वविशिष्टयण्कर्मकोच्चारणम् इति। अस्मिन् ज्ञाने -

1. विशेष्यम् - अजव्यवहितपूर्वत्वविशिष्ट-यण्कर्मकोच्चारणम्
2. प्रकारः - साधुत्वप्रकारकप्रमात्मकज्ञानीय-विशेष्यता

विशेष्यदले यण्कर्मकोच्चारणमित्यत्र विशेष्यम् - उच्चारणम्। अत्र प्रमात्मक-ज्ञानस्थलेऽपि विशेष्यतायाः अवच्छेदकमुच्चारणत्वमेव। उच्चारणत्वस्य जातिरूपत्वात् ऐक्यं वर्तते। अत्रापि उच्चारणनिष्ठा उच्चारणत्वावच्छिन्ना विशेष्यता त्रिभिः निरूपिता भवति -

1. यण्-निष्ठावच्छेदकता-निरूपिता

2. कर्मत्व-निष्ठावच्छेदकता-निरूपिता

3. साधुत्वप्रकारक-प्रमात्मक-ज्ञानीय-विशेष्यतात्वावच्छिन्न-प्रकारता-निरूपिता

प्रकारदले - प्रकारः साधुत्वप्रकारकप्रमात्मकज्ञानीय-विशेष्यता। तदवच्छेदकः साधुत्वप्रकारकप्रमात्मकज्ञानीय-विशेष्यतात्वम्। उच्चारणनिष्ठविशेष्यतायाः इदमपि अवच्छेदकम्। सा विशेष्यता साधुत्व-प्रकारक-प्रमात्मक-ज्ञानीय-विशेष्यतात्वावच्छिन्नप्रकारतानिरूपितापि भवति। एवञ्च उच्चारणनिष्ठविशेष्यतायां विशेष्यविशेषण-दलयोः समावेशः इत्थम्- यण्-निष्ठावच्छेदकतानिरूपितकर्मत्व-निष्ठावच्छेदकतानिरूपिता उच्चारणत्वावच्छिन्ना उच्चारणनिष्ठा या, साधुत्व-प्रकारक-प्रमात्मक-ज्ञानीय-विशेष्यतात्वावच्छिन्न-प्रकारता-निरूपिता विशेष्यता।

**लक्षणसमन्वयः**

स्थानपदार्थस्य परिष्कृतं लक्षणमेवं सम्पद्यते- "अवच्छेदकता-निरूपिता-वच्छेदकता-निरूपितोच्चारणत्वावच्छिन्ना या साधुत्व-प्रकारक-भ्रमात्मक-ज्ञानीय-विशेष्यतात्वावच्छिन्न-प्रकारतानिरूपिता विशेष्यता तदवच्छेदक-धर्मावच्छिन्ना या साधुत्वप्रकारकप्रमा-त्मकज्ञानीय-विशेष्यतात्वा-वच्छिन्न-प्रकारता-निरूपिता विशेष्यता तदवच्छेदकता-वच्छेदकतारूपः स्थानपदार्थः" इति॥

सुबोधाय उपर्युक्तं परिनिष्ठितं स्थान-पदार्थ-लक्षणं पञ्चधा विभज्य उपन्यस्यते अधः। उपरिष्टाद् स्फीताक्षरैः लक्षणम्, तदधः तन्वक्षरैः उदाहरणस्य समन्वयः इत्येवं क्रमेण दर्श्यते। तथाहि -

1) अवच्छेदकता-निरूपितावच्छेदकता-निरूपितोच्चारणत्वावच्छिन्नोच्चारणनिष्ठा या इग्-निष्ठावच्छेदकता-निरूपित-कर्मत्वनिष्ठावच्छेदकतानिरूपितोच्चारणत्वावच्छिन्नोच्चारणनिष्ठा या

2) साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता

3) तदवच्छेदक-धर्मावच्छिन्ना या विशेष्यतावच्छेदकोच्चारणत्वावच्छिन्ना या

4) साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वावच्छिन्नप्रकारता-निरूपिता विशेष्यता (उच्चारणनिष्ठा)।

5) तदवच्छेदकतावच्छेदकतारूपः स्थानपदार्थः। कर्मत्वनिष्ठावच्छेदकतानिरूपित-यण्-निष्ठावच्छेदकतारूपः स्थानपदार्थः। (इक् यण् च स्थानपदार्थः इति यावत्।)

**चित्रेण निरूपणम्**

1. इको यणचि इति सूत्रस्य सुधी उपास्य इति लक्ष्यम् उदाहरणत्वेन प्रकल्प्य निरूप्यते।

2. प्रत्येकं स्तरे चित्रस्य नीचैः दत्तं वाक्यं व्याख्यारूपम्, चित्रगतनिरूपणस्य अङ्गं न।

3. अन्त्ये लक्षणे इदम् अवधेयम् - स्थानपदार्थलक्षणे प्रारम्भेऽपि अवच्छेदकता उक्ता, अन्ते अपि अवच्छेदकता उक्ता। प्रारम्भे या अवच्छेदकता तस्याः अवच्छेदकतायाः आश्रयः इक्, या चरमावच्छेदकता तस्याः आश्रयः यण्।

4. मध्येचित्रं निवेशितानां सङ्ख्यानां क्रमेण प्रकाराः योज्यन्ते चेत् स्थानपदार्थस्य लक्षणं सम्पद्यते। तान् अष्टप्रकारान् संयोज्य चित्रस्य नीचैः पुनः अन्त्ये वाक्यरूपेण अपि दर्शितं बोधदार्ढ्याय।




इग्-निष्ठावच्छेदकतानिरूपितकर्मत्व-निष्ठावच्छेदकता-निरूपितोच्चा-रणत्वा-वच्छिन्नोच्चारणनिष्ठा या, साधुत्व-प्रकारक-भ्रमात्मक-ज्ञानीय-विशेष्यतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता, तदवच्छेदकोच्चा-रणत्वावच्छिन्ना या (विशेष्यता) साधुत्वप्रकारकप्रमात्मकज्ञानीय-विशेष्यतात्वावच्छिन्न-प्रकारतानिरूपिता विशेष्यता (उच्चारणनिष्ठा), सा कर्मत्वनिष्ठावच्छेदकतानिरूपितयण्-निष्ठावच्छेदकतानिरूपिता।

एवम्भूतः सम्बन्धः स्थानपदार्थेनोच्यते। परिष्कारसहितस्य उपरि उक्तस्य सरलं रूपमिदम्- 'इक् यण् च स्थान-पदार्थः' इति।

**अनल्विधिपदस्य अनेकार्थत्वम्**

अलाश्रयेति सामान्यवचनात् सर्वविभक्त्यन्तसमाससङ्ग्रहः इति बालमनोरमाकार आह। भट्टनागेशेन लघुशब्देन्दुशेखरे अवादि - "अनल्विधाविति विधिग्रहणात् अलाश्रये विधौ इत्यर्थात् यत्र विधौ शब्दतः स्थानि-स्थान्यवयवान्य-तराल्वृत्ति-धर्मवतः तेन, तस्मात्, तस्य, तस्मिन् तदादेः इत्यादिप्रकारेण विशेष्यतया विशेषणतया च अलाश्रयणं तत्र निषेधः। व्यूढोरस्केन, द्यौः, द्युभ्याम्, क इष्टः, प्रपठ्येत्युदाहरणानि।" (शास्त्री, बाल। ल.शे., भागः१, पृ.२३३) इति। शेखरवाक्ये शब्दतः इत्युक्ते 'सूत्रोपात्तः' इत्यर्थः। सूत्रोपात्त-स्थानि-स्थान्यवयवान्यतर-अलाश्रयणे स्थानिवद्भावनिषेधः इति भावः। तेन अग्रहीद् इत्यादि सिद्ध्यति। वस्तुतः अनेकार्थत्वं प्रातिपदिकनिर्देशेन सिद्धम् इति भाष्ये स्थितम्।

**अला विधौ यथा - व्यूढोरस्केन इत्यत्र नकारस्य णत्वं न।** - अला विधिः इत्यत्र अला इति कर्तरि करणे वा तृतीया। "कर्तृकरणे कृता बहुलम्" (२.१.३२/६९४) इत्यनेन तृतीयातत्पुरुषसमासः। अला विधिः अल्विधिः, न अल्विधिः अनल्विधिः। अल्कर्तृकः अल्करणको वा विधिः अल्विधिः। तस्मिन् कर्तव्ये आदेशो न स्थानिवत्। व्यूढोरस्केन इत्यत्र अल्कर्तृके विधौ णत्वं न।

व्यूढोरः+क इत्यवस्थायां "सोऽपदादौ" (८.३.३८/१५२) इति विसर्गस्थाने सकारादेशः। "अयोगवाहानाम् अट्सु णत्वम्" (शास्त्री, भार्गवः। भागः१, पृ.१२८) इति वार्त्तिकेन विसर्गस्य अट्सु पाठात्

विसर्गः अट्त्वधर्मवान्। स्थानिवद्भावेन सकारादेशे विसर्गनिष्ठस्य अट्त्वस्य अतिदेशप्रसक्तिः। तथात्वे इन इत्यस्य नकारस्य "अट्कुप्वाङ्नुम्व्यवायेऽपि" (८.४.२/१९७) इत्यनेन णत्वप्रसङ्गः। रेफषकारान्यतरोत्तरत्वविशिष्टस्य अडादिकर्तृकव्यवधानविशिष्टस्य समानपदस्थस्य नस्य णत्वम् इति तदर्थः। व्यूढोरस्केन इत्यत्र स्थानिभूतः अल् विसर्गः, तन्निष्ठधर्मः अट्त्वम्, तत्कर्तृकव्यवधानविशिष्टस्य विधीयमानं णत्वम् अला विधीयमानः अल्विधिः। तस्मिन् कर्तव्ये आदेशो न स्थानिवत्। विसर्गे अट्त्वाभावात् णत्वं न, व्यूढोरस्केन इति इष्टरूपं सिद्ध्यति।

**अलः परस्य विधौ यथा - द्यौः इत्यत्र हल्ङ्यादिलोपो न।** अलः परस्य विधिः अल्विधिः। "पञ्चमी भयेन" (२.१.३७/६९९) इत्यत्र पञ्चमीति योगविभागाश्रयणेन पञ्चमीतत्पुरुषसमासः। अलवधिकः विधिः अल्विधिः, अलवधिके विधौ न स्थानिवत्। दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इत्यस्माद् दीव्यति द्योतते इत्यर्थे "क्विप्च" इत्यनेन क्विपि दिव्-शब्दः निष्पद्यते। ततः "दिव औत्" (७.१.८४/३३६) इत्यनेन वकारस्य औत् इत्यादेशे, सुबादिप्रक्रियायाम् द्यौः इति रूपम्॥

दि+औ+स् इत्यत्र औकारस्य स्थानिवद्भावेन हल्त्वमादाय "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" (६.१.६८/२५२) इति अपृक्तस्य सस्य लोपः प्रसक्तः। वकाररूपाद् अलः परस्य सु इत्यस्य लोपरूपे कार्ये कर्तव्ये औकारः न स्थानिवत्। वकारावधिके विधौ स्थानिवद्भावनिषेधात् औकारादेशस्य हल्त्वं न। हल्त्वाभावात् हल्ङ्यादिलोपप्रसक्तिर्न। ततः द्यौः इति इष्टं रूपं सिद्ध्यति।

**अलः विधौ यथा - द्युकामः इत्यत्र उकारस्य लोपो न।** अलः विधिः इति "षष्ठी" (२.२.८/७०२) इत्यनेन षष्ठीतत्पुरुषसमासः। अल्स्थानिकः विधिः अल्विधिः इत्यर्थः। दिवं कामयते इत्यर्थे "कर्मण्यण्" (३.२.१/२९१३) इत्यनेन अणि प्रत्यये द्युकामः इति रूपम्। दिव्+काम+स् इति दशायां "प्रत्ययलोपे प्रत्ययलक्षणम्" (१.१.६२/२६२) इति अन्तर्वर्तिनीं विभक्तिमाश्रित्य "दिव्" इत्यस्य पदत्वात् अलोऽन्त्यपरिभाषासहकृतेन "दिव उत्" (६.१.१३१/३३७) इत्यनेन दिवः वकारस्य उकारे अन्तादेशे दि+उ+काम+स् इति स्थिते उकारस्य स्थानिवद्भावेन वत्वमादाय "लोपो व्योर्वलि" (६.१.६६/८७३) इति उलोपे प्रसक्ते अनल्विधौ इति तन्निषेधात् स्थानिवद्भावाभावे रूपम्। अल्स्थानिके विधौ स्थानिवत्त्वनिषेधः अयम्। उकाररूपस्य अलः स्थाने विधीयमाने लोपरूपे आदेशे कर्तव्ये आदेशो न स्थानिवत्। स्थानिवत्त्वनिषेधात् उकारस्य वकारत्वाभावात् "लोपो व्योर्वलि" (६.१.६६/८७३) इत्यस्य अप्रवृत्त्या लोपो न। ततश्च द्युकामः इति इष्टसिद्धिः।

**अलि विधौ यथा - क इष्ट इत्यत्र रोः उत्वं न।** - अलि विधिः इत्यत्र "सह सुपा" (२.१.४/६४९) इत्यनेन समासः। अल्निमित्तकः विधिः अल्विधिः इत्यर्थः। यज देवपूजासङ्गतिकरणदानेषु इति धातोः भूतार्थवृत्तेः "निष्ठा" (३.२.१०२/३०१३) इत्यनेन क्तप्रत्यये इष्टः इति रूपम्। ततः "कः होमादिना पूजितः" इत्याद्यर्थे किंशब्दात् पुंसि प्रथमैकवचनविवक्षायां सुप्रत्यये किम्+स्+इष्टः इत्यत्र "किमः कः" (७.२.१०३/३४२) इत्यनेन विभक्तौ परतः किमः कादेशे "नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे" (शास्त्री, सदाशिवः। प.शे.

पृ.२४७) इति परिभाषया अलोऽन्त्यविधिं बाधित्वा इमः अकारादेशे क+स्+इष्टः इति जाते क+स् इत्यस्य सुबन्तत्वात् पदसंज्ञायां "ससजुषोरुः" (८.२.६६/१६२) इति रुत्वे 'क+र् इष्टः' इति दशायां यकारस्थानिके इकाररूपे अलि परे स्थानिवद्भावेन इकारे यत्वम् निमित्तीकृत्य "हशि च" (६.१.११४/१६६) इति रोः उत्वविधौ प्रसक्ते इकारः न स्थानिवत्। स्थानिवद्भावनिषेधात् इकारस्य हश्त्वाभावात् रोः उत्वं न। क+र्+इष्टः इत्यत्र भोभगोसूत्रेण रेफस्य यादेशे, शाकल्यलोपे क इष्टः, कयिष्टः इति इष्टरूपद्वयसिद्धिः।

**अलादेः विधौ यथा - प्रपठ्य इत्यत्र इडागमप्रतिषेधः।** - शेखरकारेण 'तदादेः' इत्यनेन इदं सूचितम्। 'तदादेः' इत्यस्य अलादेः इत्यर्थः। अलः विशेषणतया आश्रयणं यत्र तादृशः विधिः अपि अल्विधिः इत्यभिप्रायः। अलादेः विधौ इत्यस्य अलादित्व-रूपधर्म-घटित-धर्मावच्छिन्नोद्देश्यताके विधौ इतयर्थः। यथा प्रपठ्य इत्यत्र। "प्रकर्षेण पठित्वा" इत्याद्यर्थे प्र+पठ्+त्त्वा इत्यत्र "कुगतिप्रादयः" (२.२.१८/७६१) इति प्रादिसमासे, "समासेऽनञ्पूर्वे त्त्वो ल्यप्" (७.१.३७/३३३२) इति ल्यबादेशे, प्रपठ्+य इत्यवस्थायां यकारस्य स्थानिवद्भावेन वलादित्वात् "आर्धधातुकस्येड्वलादेः" (७.२.३५/२१८४) इति इडागमप्रसङ्गः। स्थानी त्वा, स्थान्यवयवाल् तकारः, तद्वृत्तिधर्मः वल्त्वम्। 'वलादिः' इत्यत्र समासे 'वल्' विशेषणतया निविष्टः। पुनश्च 'वलादिः' इत्ययं धर्मः 'वलाद्यार्धधातुकत्वम्' इत्यत्र विशेषणम्। वलाद्यार्धधातुकत्वं तु वलादित्वरूप-धर्मघटितधर्मः। वलाद्यार्धधातुकत्वरूप-धर्मावच्छिन्नोद्देश्यताकः विधिः अलादिविधिः।

स च "आर्धधातुकस्येड् वलादेः" (७.२.३५/२१८४) इति इड्विधिः । तस्मिन् कर्तव्ये आदेशः न स्थानिवत् । अतः इडागमः न भवति, प्रपठ्य इति इष्टं रूपं सिद्ध्यति ।

**उपसंहारः**

इत्थं सङ्क्षेपतः स्थानिवत्सूत्रार्थः विमृष्टः । गभीरार्थम् इदं सूत्रं सर्वत्र प्रक्रियायाम् उपकुरुते । स्थानिवद्भावः अन्तर्जलप्रवाह इव व्याकरणप्रक्रियां पुष्णाति । पाणिनीयम् अधिजिगांसूनाम् एतत्सूत्रार्थग्रहः अनिवार्यः । यावत् विचार्यते तावत् अस्य अर्थक्षेत्रं विस्तीर्यते इत्येतत् सत्यादनपेतं वचः । अत एव सुधियः एतत्सूत्रम् अनुसन्दधानाः नवनवार्थं वितन्वानाः मोमुद्यन्ते इति शम् ।

**आश्रितग्रन्थावलिः**

**जालमूलम्**

1. अष्टाध्यायी । http://ashtadhyayi.com/

**पुस्तकमूलम्**

1. झळकीकर, भीमाचार्य । न्यायकोशः । चैखम्बा सुरभारती प्रकाशनम् । वाराणसी । २०१७ संस्करणम् ।
2. झा, नरेश । सं. । व्या. । लिङ्गानुशासनम् । चौखम्बा सुरभारती प्रकाशन । वाराणसी । २०१६ संस्करणम् ॥
3. लक्ष्मीनरसिंहः, श्रिष्टि । पाणिनीये अतिदेशानुशीलनम् । राष्ट्रियसंस्कृतविद्यापीठम् । तिरुपति । २००८ ॥

4. शर्मा, गिरिधर। सं.। परमेश्वरानन्द शर्मा। सं.। वैयाकरणसिद्धान्तकौमुदी। बालमनोरमा-तत्त्वबोधिनीसहिता। प्रथम-द्वितीय-तृतीय-चतुर्थ-भागाः। मोतिलाल बनारसीदास। दिल्ली। प्रथमः-२०१४ द्वादश मुद्रण, द्वितीयः-२०१७ नवम मुद्रण, तृतीयः-२०११ नमव मुद्रण, चतुर्थः-२०११ षष्ठ मुद्रण॥

5. शास्त्री, बाल। सं.। गुरुप्रसादशास्त्री। संक.। व्या.। लघुशब्देन्दुशेखरः। पञ्चसन्ध्यन्तः प्रथमः भागः। चौखम्बा सुरभारती प्रकाशन। वाराणसी। २०१३ संस्करणम्॥

6. शास्त्री, भार्गवः। सं.। व्याकरणमहाभाष्यम्। १-६ भागाः। चौखम्बा संस्कृत प्रतिष्ठान। दिल्ली। २०१४ पुनर्मुद्रितसंस्करणम्।

7. शास्त्री, सदाशिव। सं.। परिभाषेन्दुशेखरः। चौखम्भा संस्कृत संस्थान। वाराणसी। १९८७ पंचम संस्करण॥

8. शास्त्री, सदाशिव। सं.। प्रौढमनोरमा,(अव्ययीभावान्ता)। चौखम्बा अमरभारती प्रकाशन। वाराणसी। १९८३ द्वितीय संस्करण॥

# 4

## सज्जनेन्द्रप्रयोगकल्पद्रुमे व्याकरणांशाः

नागरत्ना हेगडे

संस्कृतवाङ्मये व्याकरणं महत्त्वभूतं स्थानम् आसादयति। संस्कृते शास्त्रग्रन्थाः स्युः, काव्यादिकानि स्यान्नाम, किन्तु विना व्याकरणं कोऽपि ग्रन्थः न सिद्ध्यति इति विदितमेव सर्वैः। व्याकरणप्रधानानि काव्यानि अपि बहुभिः शास्त्रकारैः कविभिः व्यरच्यन्त इत्यपि वयं जानीमः। आदौ तावत् “व्याकरणप्रधानानि काव्यानि” इति विषये किञ्चित् प्रस्तोतुमिष्यते।

### व्याकरणप्रधानानि काव्यानि कानिचन

#### भट्टिकाव्यम्

अयं ग्रन्थः शास्त्रकाव्यपरम्परायां सर्वापेक्षया महत् स्थानम् आवहति। सर्वविदितत्वात् अत्र विस्तारः न क्रियते।

#### कविरहस्यम्

इदं किञ्चन काव्यम्। अस्मिन् ग्रन्थे दक्षिणभारतीयस्य राष्ट्रकूटस्य नरेशस्य कृष्णराजस्य गौरववर्णनेन सह व्याकरणनियमानां यथासम्भवं समावेशः कृतः। अस्मिन् काव्ये शब्दशास्त्रस्य शिक्षा महत्त्वं आवहति, कृष्णराजस्य वैशिष्ट्यवर्णनं गौणतां याति। अत्र कविना आत्मनः परिचयः न कृतः, किन्तु काव्यस्य अन्तिमश्लोके “सदभिधाननिधानहलायुधद्विजवरस्य कृतिसुकृतात्मनः[1]” इति

[1] कविरहस्यम् - अन्तिमवाक्यम्

वदति। अस्य आश्रयदाता कृष्णराजः आसीत् इति ज्ञायते। अस्मिन् काव्ये सुष्ठुरूपेण कृष्णराजस्य गुणवर्णनं कृतं वर्तते। कविरहस्ये अयं श्लोकः नितरां प्रसिद्धः अस्ति –

धूनोति[2] चम्पकवनानि धुनोत्य[3]शोकं,
चूतं धुनाति[4] धुवति[5] स्फुटितातिमुक्तम्।
वायुर्विधूनयति[6] चम्पकपुष्परेणून्
यत्कानने धवति चन्दनमञ्जरीश्च[7] ॥

अस्मिन् श्लोके स्वादि, क्र्यादि, तुदादि, चुरादि, भ्वादिगणेषु विद्यमानान् धू, धु धातून् सङ्गृह्णाति।

कविः स्वस्य आश्रयदातुः कृष्णराजस्य महिमानम् एवं प्रस्तौति –

तृष्णां न पुष्णाति यशांसि पुष्यति
प्रचारणैर्विप्रमनांसि पोषति।
भृत्यांश्च यः पोषयति हितैर्धनैः
प्रतिक्षणं पूषति यस्य विक्रमः[8]

अस्मिन् श्लोके दिवादि-क्र्यादि-भ्वादि-चुरादिगणीयानां पुष्-धातूनां, भ्वादिगणस्य पुष् धातोः च रूपाणाम् उदाहरणानि प्रस्तुतानि।

**रावणार्जुनीयम्**

इदं किञ्चन काव्यम्। अस्य काव्यस्य रचयिता भट्टभौमिकः। "रावणार्जुनीयम्" इति काव्यनाम्ना एव स्पष्टं ज्ञायते यत् रावणस्य कार्तवीर्यार्जुनस्य च कथा अत्र निबद्धा वर्तते इति। अस्मिन् ग्रन्थे कविः पाणिनेः अष्टाध्याय्याः सूत्राणाम् उल्लेखं कुर्वन् उदाहरणाय

[2] धूञ् कम्पने (स्वादिः) दीर्घान्तोऽपि इत्युक्तत्वात्। [3] धुञ् कम्पने (स्वादिः) [4] धुञ् कम्पने (क्र्यादिः) [5] धू विधूनने (तुदादिः) [6] धूञ् कम्पने (चुरादिः) [7] कविरहस्यम् - श्लोकः - ८ [8] कविरहस्यम् – श्लोकः -२१

श्लोकान् निरूपयति। सम्पूर्णं काव्यं २७ सर्गेषु विभक्तमस्ति। अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादस्य "चतुर्थी सम्प्रदाने" इत्यस्य सूत्रस्य उदाहरणं ज्ञापयितुं अयं श्लोकः निबद्धः।

आलोकमिन्दुः प्रददौ जनाय जनोऽपि गन्तुं रतये खचेतः।
मानाय नारीजनताप्यदत्त तोयं शशाङ्कद्युतिदर्शिताध्वा[9] ॥

अत्र चतुर्थ्याः उदाहरणाय जनाय, रतये, मानाय चेति प्रयोगः कृतः। एवमेव 'तव्यत्तव्यानीयरः' (३.१.९६), 'अचो यत्' (३.१.९७) 'पोरदुपधात्' (३.१.९८) इत्येतेषां सूत्राणाम् उदाहरणनिरूपणाय अयं श्लोकः रचितः कविना।

कर्तव्यमशेषमत्र नद्या करणीयं तव मज्जनादियुक्तम्।
जेयश्च परिश्रमोऽमुना ते लभ्यः पुण्यचयः सुखेन चाशु[10] ॥

अस्मिन् तव्यत्-अनीयर्-यत्-प्रत्ययानाम् उदाहरणदर्शनाय कर्तव्यं, करणीयं, जेयः, लभ्यः इति पदानां प्रयोगः कृतः।

सम्प्रति शोधपत्रस्य मुख्यविषयः प्रस्तूयते।

## सज्जनेन्द्रप्रयोगकल्पद्रुमे व्याकरणांशाः

धर्माधिकारिकृष्णपण्डितविरचितः सज्जनेन्द्रप्रयोगकल्पद्रुमः किञ्चन काव्यम्। अत्र कविः महाराजं स्तौति। इदं व्याकरणप्रधानकाव्यम् इति ज्ञायते पठनात्।

### ग्रन्थपरिचयः

सज्जनेन्द्रप्रयोगकल्पद्रुमे प्रतिपाद्यः विषयः व्याकरणम्। व्याकरणं हि नीरसमिव मन्यमानानामरुचिकरविषयमिव प्रतिपादयतां विद्यार्थिनां

[9] रावणार्जुनीयम् - ६-१७ [10] रावणार्जुनीयम् - ९-१८

कथं नाम चेतसे रोचेत, चित्तमाकर्षन्तं तदन्तरूपलभ्यमानं कमपि काव्यरसास्वादं विना इति मत्वा कारकसमासतद्धिततिङन्तकृदन्ताः चेति प्रकरणपञ्चकप्रतिपादितान्प्रसिद्धान् कांश्चिद्विषयान् कौमुद्युक्तसूत्रार्थप्रतिपादनविधया यथोचितरचनाविशेषकौशलेन अनुष्टुप्-छन्दोरूपेण सङ्ग्रथ्य सर्वत्र उदाहरणानि स्वनिर्मितान्येव प्रदर्शितानि ग्रन्थकारेण। श्रीमत्सज्जनसिंहभूपालवर्णनरूपाणां च तेषामुदाहरणानां सङ्घटनमपि साधु सम्पादितम्।

ग्रन्थेऽस्मिन् ग्रन्थनामानुरूपं ग्रन्थकारेण प्रकल्पितानि प्रकरण-भेदप्रतिपादकानि पञ्च कुसुमानि। कारककुसुमं, समासकुसुमं, तद्धितकुसुमं, तिङ्कुसुमं, कृत्कुसुमं चेति यथाक्रमं तेषां नामानि। अत्रापि समासतः निरूप्यते किञ्चित्। आदौ तावत् कारककुसुमे षण्णां कारकाणां, विभक्तीनां च सप्तानां वर्णनम् उपलभ्यते। उपक्रमोपसंहारपद्यैश्च सम्पुटितान्येतानि पञ्च कुसुमानि। इत्थमयमल्पीयानपि व्याकरणविषयकः ग्रन्थः काव्यरूपतां प्राप्तः नूनं चेतसे रोचते।

अस्मिन् ग्रन्थे आहत्य २५१ कारिकाः सन्ति। सज्जनेन्द्रप्रयोग-कल्पद्रुमस्य कारककुसुमस्य केचन एव विचाराः प्रस्तूयन्ते शोधपत्रस्य विस्तरभिया।

आदौ कारककुसुमस्थकारिका -

अथ प्रयोगं जिज्ञासुर्जानीयात् कारकं पुरा।
संज्ञाभिः षड्विधं प्रोक्तं ता उच्यन्ते पृथक् पृथक्[11]

[11] स.प्र.का. - १

ग्रन्थकारः कर्तृभेदान् निरूपयति -

कर्ता स्वतन्त्र इत्युक्तः स चतुर्विध ईरितः ।
उक्तोऽनुक्तस्तथा हेतुः कर्मकर्ता चतुर्थकः[12]

स्वतन्त्रः कर्ता (१.४.५४) इति कर्तृसंज्ञा। कर्तरि काः विभक्तयः भवन्तीति विव्रियते।

तत्र कर्तर्यभिहिते प्रथमैव विधीयते।
तृतीया चाथवा षष्ठी स्मृताऽनाभिहिते यथा[13]

अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः ।

उक्तकर्ता यथा -

दिने दिने सज्जनसिंहभूपः करोति धर्मं समुदर्कबीजम् ।
मैत्रीं सुधीभिर्भजते सहास्मादुपैति लक्ष्मीं परिवर्धमानाम् ॥

अत्र करोति, भजते, उपैति इत्यत्र कर्तरि लडादेशतिङो विहितत्वेन कर्तुरुक्तत्वात् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (२-३-४६) इति प्रथमाविभक्तिः। पुण्यकरणे, मैत्रीसम्पादने, लक्ष्मीप्राप्तौ च सज्जनसिंहस्य स्वतन्त्रकर्तृत्वम्।

अनुक्तकर्ता यथा -

पूर्वाह्णे चर्यते धर्मोऽपराह्णेऽर्थो विचिन्त्यते।
नक्तं संसेव्यते कामः सज्जनेन्द्रेण सर्वदा ॥

अस्मिन् श्लोके चर्यते, विचिन्त्यते, संसेव्यते इत्यादिषु तिङा कर्मणः अभिहितत्वेन कर्तुरनुक्तत्वात् अनभिहिते (२-३-१) इत्यधिकारे 'कर्तृकरणयोस्तृतीया' (२-३-१८) इति कर्तरि तृतीया।

---

[12] स.प्र.का. - २ [13] स.प्र.का. - ३

कर्मकारकस्य किञ्चिदुदाहरणं दर्श्यते -

क्रियाफलाश्रयं कर्म तच्चतुर्विधमीरितम् ।
उक्तानुक्ते कर्तृकर्माकथितं चेति ते पुनः ॥[14]
उक्तानुक्ते द्विधा प्रोक्ते ईप्सितानीप्सिते इति ।

कर्तुः व्यापारः यत्र तिष्ठति, तत् कर्मेत्यर्थः ।
कर्मणि काः विभक्तयः भवन्तीत्याह । पुनश्च कारिका -

प्रथमाभिहिते कर्मण्यनुक्ते तु द्वितीयिका[15]
तृतीया तु चतुर्थी च षष्ठी चैव भवन्ति हि[16]

अत्र सज्जनकाव्ये अभिहितेप्सितं यथा -

कदाचिद्गन्तुकामस्य सज्जनेन्द्रस्य मन्त्रिणा ।
सभ्यैः सार्धं राजकार्यं क्रियते तत्त्वदर्शिना ॥

अत्र "क्रियते" इति क्रियायाः फलं राजकार्यमेवाश्रयति इति तस्य कर्मत्वम् । तिङा कर्मणोऽभिहितत्वात् प्रथमैव । राजकार्यस्य इष्टत्वात् 'कर्तुरीप्सिततमं कर्म' (१-४-४९) इति कर्मसंज्ञा ।

अभिहितानीप्सितं यथा -

आरामे सज्जनेन्द्रेण लसत्कुसुमसङ्कुले ।
तरोः सञ्छिद्यते पत्रं कुसुमानि विचिन्वता ॥

अत्र कुसुमावचयक्रियायां कुसुमानामीप्सितत्वं, पत्रच्छेदनस्य इष्टत्वाभावात् पत्रस्य अनीप्सितत्वम् ।

अथ करणकारकम् -

क्रियोपकारकं यत्तत् करणं त्वेकमेव हि ।

---

14 स.प्र.का. - ४,५ 15 स.प्र.का. - ५ 16 स.प्र.का. - ६

तृतीया पञ्चमी चैव षष्ठी च करणे भवेत्[17]

तृतीयायाः उदाहरणम् -

छन्दोऽलङ्कृतिकाव्यनाटककलाकोशार्थशास्त्रादिक-
व्यासङ्गाप्तविचारतर्कविभवप्रोद्यन्मनीषावता ।
सर्वां "श्यामलदान"मन्त्रिपतिना सप्ताङ्गराज्यस्य वै
श्रीमान् सज्जनसिंह एष वहति प्राज्यां धुरं नित्यशः ॥

अत्र सज्जनसिंहस्य सप्ताङ्गराज्यधुर्वहनक्रियायां श्यामलदानस्य प्रकृष्टोपकारकत्वात् करणत्वम् । 'साधकतमं करणम्' (१-४-४२) इति करणसंज्ञा । 'अनभिहिते' (२-३-१) इत्यधिकारे "कर्तृकरण-योस्तृतीया (२-३-१८) इति तृतीया ।

अग्रे सम्प्रदानकारकस्य उदाहरणं प्रदर्श्यते -

क्रियया यमभिप्रैति सम्प्रदानं स उच्यते ।
चतुर्थी च तृतीया च भवतः सम्प्रदानके[18] ॥

अत्र चतुर्थ्याः उदाहरणम् -

वर्षाऽशनानि भूमिं च वाहनानि गृहाणि च ।
गाः स्वर्णं च द्विजातिभ्यः सज्जनेन्द्रो ददात्यलम् ॥

अत्र "ददाति" इति दानक्रियायां द्विजातयः आभिमुख्येन सम्बध्यन्त इति तेषां सम्प्रदानत्वम् । 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (१-४-३२) 'चतुर्थी सम्प्रदाने' (२-३-१३) इति चतुर्थी ।

तृतीया यथा -

संयच्छते भूषणानि दास्या यो यश्च तादृशः ।
कदापि सज्जनेन्द्रस्य पुरो न स्थातुमर्हति ॥

---

[17] स.प्र.का. - ७ [18] स.प्र.का. - ८

अत्र यच्छब्दवाच्यकामुकस्य भूषणदानक्रियायां दास्याः सम्प्रदानत्वम्। "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया" इति तृतीया।

रोचते सज्जनेन्द्राय विद्या संश्लाघते वधूः।
सौख्यं शिवो धारयति नित्यं स्पृहयति प्रजाः॥

अत्र रुच्-धातुयोगे प्रीयमाणत्वात्, श्लाघधातुयोगे बोधयितुमिष्टत्वात्, ण्यन्तधृधातुयोगे भक्त्या शिवकर्तृकसौख्यदानविषये उत्तमर्णत्वात्, स्पृहधातुयोगे प्राप्तुमिष्टत्वाच्च सज्जनेन्द्रस्य सम्प्रदानत्वम्। "चतुर्थी सम्प्रदाने" इति चतुर्थी।

क्रुधद्रुहेर्ष्याऽसूयार्थयोगे यं प्रति कोपनम्[19]

यथा -

शत्रवः सज्जनेन्द्राय ह्यसमर्था रणाजिरे।
क्रुध्यन्तीर्ष्यन्त्यसूयन्ति द्रुह्यन्ति च पुनः पुनः॥

अत्र क्रुधादीनां धातूनां योगे सज्जनेन्द्रं प्रति कोपत्वात् तस्य 'क्रुधद्रुहेर्ष्याऽसूयार्थयोगे यं प्रति कोपः' (१-४-३७) इति सम्प्रदानत्वम्।

अपादाने यथा -

विश्लषेऽवधिभूतं यत् तदपादानमीरितम्।
पञ्चम्येव त्वपादाने वर्तते, न ततोऽन्यथा[20] ॥

यथा -

वदान्यः सज्जनेन्द्रोऽयमिति श्रुत्वा मनीषिणः।
देशाद्देशात्समायान्ति सत्कृताश्च व्रजन्त्यपि॥

[19] स.प्र.का. - १० [20] स.प्र.का. - ११

अत्र मनीषिणां सज्जनेन्द्रसमीपागमनक्रियायां स्वदेशविश्लेषे तत्तद्देशानामवधिभूतत्वात् अपादानत्वम्। 'ध्रुवमपायेऽपादानम्' (१-४-२४) इति अपादानसंज्ञा। 'अपादाने पञ्चमी' (२-३-२८) इति पञ्चमी।

अधिकरणकारकं यथा -

आधारश्चाधिकरणं तच्च त्रेधा प्रकीर्तितम्।
अभिव्यापकमौपेश्लषिकं वैषयिकं तथा[21] ॥
सप्तम्येवाधिकरणे सामान्यमिति कीर्तितम्[22] ॥

तत्र अभिव्यापकं यथा -

द्रव्येषु स्वामिभावात्, गुणिगणहृदये दातृभावात् प्रजानां
स्वान्ते तातत्वतोऽन्तःपुरयुवतिजने वल्लभत्वाद्रिपूणाम्।
चित्ते हन्तृत्वतोऽयं, खलकुलहृदये दण्डदत्वात् सखीनां
चेतस्याह्लादकत्वात् इव विजयते सज्जनेन्द्रः समस्मिन्॥

अत्र सज्जनेन्द्रस्य स्वामित्वादिहेतुभिर्द्रव्यादीनभिव्याप्यस्थितिरिति द्रव्यादीनामभिव्यापकाधिकरणत्वम्। 'आधारोऽधिकरणम्'(१-४-४५) इत्यधिकरणसंज्ञा। 'सप्तम्यधिकरणे च' (२-३-३६) इति सप्तमी।
औपेश्लषिकं यथा -

विमलतरजलाशयातिरम्ये दृढगिरिदुर्गवति प्रसन्नराष्ट्रे।
सममुदयपुरे समस्तवर्णैर्निवसति सज्जनभूपतिः प्रवीरः॥

अत्र सज्जनभूपतेर्निवासस्यैकदेशाश्रयत्वात् उदयपुरस्य औपेश्लषिकम् अधिकरणम्।

[21] स.प्र.का. - १५ [22] स.प्र.का. - १६

वैषयिकं यथा -

सत्कर्मणि गुणज्ञाने प्रजानां परिपालने।
सज्जनक्षोणिपालस्य स्पृहा नित्यं प्रवर्धते ॥

अत्र सज्जनक्षोणिपालस्य स्पृहायाः सत्कर्मादीनि विषया इति तेषां वैषयिकाधिकरणत्वम्। इत्यधिकरणकारकम्। इति कारकसामान्यम्। अग्रे कारकविशेषाः अपि सोदाहरणं निरूप्यन्ते ग्रन्थकारेण। अत्र पत्रे तत् न विस्तार्यते।

अग्रे समासकुसुमस्य उदाहरणमेकं दर्श्यते।

समासो द्विविधः प्रोक्तः सामान्यश्च विशेषकः।
सामान्यं केवलं ज्ञेयः सुबन्तेन सुबन्ततः[23] ॥

सामान्यस्य उदाहरणम् -

ज्ञाने सुकीर्तौ सुकृते प्रतापे माने च धैर्ये विनये नये च।
क्षोणीतले सज्जनभूपतुल्यो न भूतपूर्वो न च दृष्टपूर्वः ॥

अत्र पूर्वं भूतः "भूतपूर्वः" , पूर्वं दृष्टो "दृष्टपूर्वः" इति सामान्यतः 'सह सुपा' (२-१-४) इति समासः।

तद्धितकुसुमस्य किञ्चन उदाहरणं दर्श्यते -

रक्ताद्यर्थेषु ठक्छौ ढक् ड्यड्ड्यौ प्रातिस्विका अपि[24] ।

यथा -

श्रीसज्जनेन्द्रस्य पुरङ्गनानां कौसुम्भहारिद्रसुनीलशाट्यः।
गृह्णन्ति सौधेषु सिताभ्रपङ्क्तौ तडिद्युजीन्द्रायुधभूरिशोभाम् ॥

अत्र "कुसुमेन रक्ताः" कौसुम्भ्यः, "हरिद्रया रक्ताः" हारिद्र्यः इति

---
[23] स.प्र.का. - ५७ [24] स.प्र.का. - ९१

'तेन रक्तं रागात्' (४-२-१) इति अण्, “नील्या रक्ता नील्यः” इति “नील्या अन्” इत्यनेन अन्।

तिङ्-कुसुमस्य किञ्चन उदाहरणम् -

त्वद्गेहे भवतीन्दिरात्ति मधुरं भूदेवसङ्घो जुहो-
त्यग्नौ होतृगणो हविः, पितृसुरा दीव्यन्ति सुन्वन्ति च।
सोमं पातुमरींस्तुदन्ति बलिनो रुन्धन्ति तन्वन्ति ते
कीर्तिं सज्जनसिंह ! चोरयति व क्रीणाति सा स्वःश्रियम्॥

अत्र दशगणीयप्रथमधातूनां पृथक् पृथग् विकरणप्रदर्शनाय सामान्यतः सङ्क्षेपेण रूपाणि उदाहृतानि।

येष्वर्थेषु लकाराः स्युस्ते कथ्यन्ते विशेषतः।
भूतानद्यतने चैव परोक्षे लिट् प्रकीर्तितः[25] ॥

यथा -

पपाठ बहुला विद्या सारं तासां बुबोध[26] च।
आचचार तदुक्तं हि सज्जनेन्द्रो निरालसः॥

अत्र पठ, बुध, चर धातुभ्यः 'परोक्षे लिट्' (३-२-११५) इति लिट्।

कृत्-कुसुमस्य किञ्चन उदाहरणम् -

धर्ता भूवलयस्य दुःखदमकः कृत्यैः प्रजारञ्जनः
स्थायी संसदि देवपूजनरतो विप्रप्रियः सत्यवाक्।
चारैः पश्य उदारधीः सुलवकोऽरीणां नृपाराधितः
श्रेयश्चार उपायविद्विजयते श्रीसज्जनाधीश्वरः॥

अत्र कर्त्रर्थे 'धर्ता' इति धृधातोः, दमयतीति 'दमकः' दम्-धातोः

[25] स.प्र.का. - १७३ [26] बुध अवगमने इति भौवादिकात् लिट्

'ण्वुल्-तृचौ' (३.१.१३३) इति तृच्ण्वुलौ। एवं रञ्जयतीति ’रञ्जनः’, तिष्ठतीति ’स्थायी’. दीव्यतीति ’देवः’ इति रञ्जस्थादिव्-धातुभ्यो 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (३.१.१३४) इति क्रमात् ल्युः, णिनिः, अच् च। एवं प्रीणातीति ’प्रियः’ इति 'इगुपधज्ञाप्रीकिरः कः (३.१.१३५) इति कः। एवं, चरन्तीति ’चाराः’ इति 'ज्वलितिकसन्तेभ्यो णः (३.१.१४०) इति णः। तथा पश्यतीति ’पश्यः’ इति 'पाघ्राध्माधेड्-धृशः शः' (३.१.१३७) इति “शः”। एवं साधु लुनातीति ’सुलवकः’ इति 'प्रुसुल्वः समभिहारे वुन्' (३.१.१४९) इति वुन्। तथा नॄन् पाति ’नृपः’ इति 'आतोऽनुपसर्गे कः' (३.२.३) इति कः। एवं श्रेयश्चरतीति ’श्रेयश्चारः’ इति 'कर्मण्यण्' (३.२.१) इति कर्मोपपदेऽण्।

कारकसमासतद्धिततिङ्कृत्कुसुमैः सुगन्धिभिः फुल्लैः।
भवति स्म सज्जनेन्द्रप्रयोगकल्पद्रुमः पूर्णः॥

एवम् अस्मिन् ग्रन्थे दैनन्दिनोपयोगिनः व्याकरणांशाः अत्यन्तं सारल्येन सुललितया च शैल्या निरूपिताः। तस्मात्, प्राचीनः सज्जनेन्द्रप्रयोगकल्पद्रुमनामकः अयं काव्यग्रन्थः विशेषतया अध्ययनार्हः, सर्वोपयोगी च स्यात् इति मम आशयः।

**आकरग्रन्थाः**

१. पाणिनिविरचिता अष्टाध्यायी।

२. कविरहस्यम्।

३. भट्टभौमिकविरचितं रावणार्जुनीयम्।

४. धर्माधिकारिकृष्णपण्डितविरचितः सज्जनेन्द्रप्रयोगकल्पद्रुमः।

# 5

## तन्त्रयुक्तिः - प्राचीनभारतीयशास्त्रग्रन्थप्रणयनपद्धतिः

म. जयरामः

### उपोद्घातः

तमिल्नाडुकेरलराज्ययोः सार्वजनिकवैयक्तिकसङ्ग्रहालयेषु उपलक्षं पाण्डुलिपिग्रन्थाः सन्ति। तेषु १२,२५० पाण्डुलिपिग्रन्थाः विज्ञान-सम्बद्धाः। पुनः तेषु ३५०० स्वतन्त्रग्रन्थाः (इतरे प्रतिकृतयः)। एतेषु केवलं २३० प्रकाशिताः। डॉ. के.वी.शर्मा, अस्य सर्वेक्षणगणस्य अध्यक्षः, कथयति यत् - "अनेन इदं पर्यवस्यति यत् भारतविषये ये विद्वांसः अध्ययनरताः, ये च इतिहासविदः एतान् सप्तप्रतिशतं ग्रन्थान् एव भारतीयविज्ञानसंविदः सर्वस्वमिति अभिमन्यमानाः सन्ति इति... ।"[1]

इयं भारतस्य प्राचीनवैज्ञानिकग्रन्थ-विषयक-परिज्ञानस्य दयनीय-स्थितिः। अतिविरलाः एव जानीयुः यत् भारते वैज्ञानिक-सैद्धान्तिक-ग्रन्थानां रचनार्थं काचित् कार्यप्रणाली, पद्धतिः आसीदिति॥ अस्याः पद्धत्याः नामैव तन्त्रयुक्तिः इति।

[1] Sharma and Shastri, 2000, Introduction

विद्वांसः तन्त्रयुक्तेः निर्वचनं बहुधा कृतवन्तः। एतैः निर्वचनैः तन्त्रयुक्तेः युक्तः परिचयः प्राप्यते -

1. संस्कृत-वैज्ञानिक-ग्रन्थानां कार्यप्रणाली - के.वि.शर्मा[2]
2. वैज्ञानिक-तर्काणां रूपम् - एस.सि.विद्याभूषणः[3]
3. ग्रन्थस्य योजना/स्वरूपम् - शामा शास्त्री[4]
4. विचार-करण-विधिः, व्याख्या-नियमाः - एस्तर् सोलोमेन्[5]
5. तानि औपचारिक-तत्त्वानि यानि वैज्ञानिकस्य कार्यस्य वास्तविकं रूपमापादयन्ति - गेर्हार्ड् ओबर्हामर्[6]
6. संस्कृते वैज्ञानिकसौद्धान्तिकग्रन्थरचनपद्धतिः- डबल्यू. के. लेले[7]
7. सा सदुपायान्विता कार्यप्रणाली या वैज्ञानिक-ग्रन्थानां व्यवस्थितरूपेण रचनार्थं विशदीकरणार्थं च दक्षतां प्रयच्छति - एन्.ई.मुत्तुस्वामी[8]
8. विज्ञानलेखने कार्यप्रणाली - सुरेन्द्रनाथ मित्तलः[9]

**शब्दनिर्वचनम्**

तन्त्रस्य युक्तिः - तन्त्रयुक्तिः इति तन्त्रयुक्तिपदस्य विग्रहः। तन्त्रशब्दस्य नैके अर्थाः भवन्ति॥ तत्रैका परिभाषेत्थम्[10] -

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते॥

---

[2] Sharma,2006, p.31-32 [3] Vidyabhushana, 1970, p.24 [4] Shastry, 1915, 459 [5] Solomon, 1976, p.73 [6] Obberhamer,1967-68 p.600 [7] Lele, 2006, Cover page [8] Muthuswamy, 1974,p.i [9] Mittal, 2000, p.22 [10] अजितागमः, १.११५

अर्थात् - सिद्धान्त-सदुपदेश-समन्विताः विचाराः यत्र विस्तरेण विमृश्यन्ते तत् तन्त्रम्। किञ्च यद् रक्षत्यपि तत् तन्त्रम्।

चरकसंहितायां[11] तन्त्रशब्दस्य पर्यायवाचिनः शब्दाः दृश्यन्ते - "तत्रायुर्वेदः शाखा विद्या सूत्रं ज्ञानं शास्त्रं लक्षणं तन्त्रमिति अनर्थान्तरम्"

व्युत्पत्तितः, कोशाद्यलवलोकनतः, प्रयोगशरणातया च तन्त्रयुक्ति-घटकीभूतः तन्त्रशब्दः - व्यवस्थिता वाङ्मयप्रस्तुतिः इति निर्वक्तुं शक्यते।

अथ युक्तिशब्दार्थः[12] - "युज्यन्ते सङ्कल्प्यन्ते सम्बध्यन्ते परस्परमर्थाः प्राकरणिके अभिमतेऽर्थे विरोधव्याघातादिदोषजातम् अपास्यानयेति युक्तिः"।

निष्कर्षतः तन्त्रयुक्तिर्नाम तान्युपकरणानि यानि व्यवस्थिततया विचारितानाम् अर्थानां प्रस्तुतौ सहकारीणि इति॥

**तन्त्रयुक्तीनाम् आवलिः**

सामान्यतः प्राचीनग्रन्थेषु तन्त्रयुक्ति-शब्दितानाम् उपकरणानाम् अवलिः प्रदीयते, निर्वचनं क्रियते, तेषाम् उपकरणानां प्रयोगस्थलमपि प्रदश्यर्ते।केचन ग्रन्थाः तन्त्रयुक्तीनामावलिं केवलां प्रददति। प्राप्तेषु तन्त्रयुक्तिसमुल्लेखेषु द्वात्रिंशत् तन्त्रयुक्तीनां सनिर्वचनं सोदहारणप्रदर्शनं विशदीकरणम् कौटिलीयार्थशास्त्रे प्रथमतः उपलभ्यते। अर्थशास्त्रगता तन्त्रयुक्तीनां सूची - इत्थम् (अधिकरणम् १५) -

[11] 1.30.21.31-32 [12] Sharma, 1949, p.1

“अधिकरणं, विधानं, योगः, पदार्थः, हेत्वर्थः, उद्देशः, निर्देशः, उपदेशः, अपदेशः, अतिदेशः, प्रदेशः, उपमानम्, अर्थापत्तिः, संशयः, प्रसङ्गः, विपर्ययः, वाक्यशेषः, अनुमतं, व्याख्यानं, निर्वचनम्, निदर्शनम्, अपवर्गः, स्वसंज्ञा, पूर्वपक्षः, उत्तरपक्षः, एकान्तः, अनागतावेक्षणम्, अतिक्रान्तावेक्षणम्, नियोगः, विकल्पः, समुच्चयः, ऊह्यम् इति”

**तन्त्रयुक्तीनां वैशिष्ट्यम्**

तन्त्रयुक्तीनां चत्वारि वैशिष्ट्यानि कथयितुं शक्यानि। तानि च-

1. वैज्ञानिक-सैद्धान्तिक-ग्रन्थानां रचने पथप्रदर्शकत्वेन तन्त्रयुक्तीनां प्रभावः प्रायः १६०० वर्षाणि आसीत्।
2. तन्त्रयुक्तीनां संस्कृतेतर-साहित्येष्वपि प्रभावः आसीत्।
3. व्यवस्थितस्य कस्यचन ग्रन्थस्य रचनार्थम् अपेक्षितानां मूलभूतानां पद्धतीनां सङ्ग्रहः तन्त्रयुक्तिषु विद्यते।
4. यथापेक्षितं तन्त्रयुक्तिस्थानां सामग्रीणां समुपयोगः भवितुमर्हति (Customize-able)

अधुना एतेषां चतुर्णां वैशिष्ट्यानां किञ्चिद्विस्तरेण विमर्शः क्रियते-

**तन्त्रयुक्तीनां प्रभावः प्रायः १६०० वर्षाणि**

तन्त्रयुक्तीनां रचानायाः आरम्भावधिः सामान्ययुगात् प्राक् षष्ठं शतमानमिति विदुषः विद्याभूषणस्य मतम्।[13] किन्तु इदमवधेयं यत् विद्वान् विद्याभूषणः सामान्ययुगात् प्राक् षष्ठशतमाने तन्त्रयुक्तीनां बीजावपमेव कथयति, न तु तत्कालीनस्य कस्यचन ग्रन्थस्य समुद्धरणं प्रयच्छति तन्त्रयुक्तिमत्तया।

[13] vidyabhushana, 1970,p.24

एतत् पूर्वमेव उल्लिखितं यत् कौटिल्यार्थशास्त्रे इदम्प्रथमतया तन्त्रयुक्तीनां विवरणमुपयोगश्च परिदृश्यते इति॥ अर्थशास्त्रं राजनीतिसम्बद्धः कश्चन प्राचीनः ग्रन्थः इति सर्वविदितम्। ग्रन्थकर्त्रा कौटिल्येन निजग्रन्थस्य अन्तिमाधिकरणस्य नाम तन्त्रयुक्तिः इति कृतमस्ति। तस्मिन्नधिकरणे तन्त्रयुक्तीनां सूची, निर्वचनं, ग्रन्थे तत्तद्युक्तीनां प्रयोगस्थलं च प्रदर्शितमस्ति। अर्थशास्त्रग्रन्थस्य रचनावधिः सामान्ययुगस्य प्राक् चतुर्थशताब्दाद् सामान्ययुगस्य तृतीयशतमानपर्यन्तम् स्यादिति तद्विद्भिः कथ्यते।[14]

चरकसंहितायाः सिद्धिस्थाने द्वादशोऽध्याये ४१तः आरभ्य-४५पर्यन्तेषु श्लोकेषु षट्त्रिंशत् तन्त्रयुक्तीनां सङ्ग्रहः प्रदृश्यते॥ चरकसंहितायाः तन्त्रयुक्तीनां प्रस्तुतिक्रमः अर्थशास्त्रप्रस्तुतिक्रमाद् भिद्यते इत्यवधेयम्। कासाञ्चन युक्तीनां नामापि न समानं तयोः ग्रन्थयोः। चरकस्य कालः प्रायः सामान्ययुगात् प्राक् प्रथमं शतमानम्।[15]

सुश्रुतसंहितायाः कालः सामान्ययुगे प्रथमशतमान-तृतीयशतमानयोः मध्ये इत्युच्यते[16] अस्य ग्रन्थस्य पञ्चषष्टितमेऽध्याये द्वात्रिंशत् तन्त्रयुक्तयः समुल्लिखिताः। अत्रत्य-युक्तीनां सङ्ख्या अर्थशात्रीय-युक्तिभिः समाना चेदपि युक्तीनां क्रमे, तासां निर्वचने च भेदः दृश्यते।

आचार्यस्य वाग्भटस्य (सामान्ययुगे ३/४ शतमानम्) अष्टाङ्गसङ्ग्रहग्रन्थे उत्तरस्थाने पञ्चाशत्तमेऽध्याये षट्त्रिंशत् तन्त्रयुक्तीनां

[14] Lele, 2006, pp.8-9 [15] Lele, 2006, p.10 [16] Lele, 2006, p.11

विवरणं विद्यते।[17] आचार्यस्य वाग्भटस्यैव अष्टाङ्गहृदयेऽपि तन्त्रयुक्तीनामुल्लेखः विद्यते।

न्यायसूत्राणां भाष्यकारः आचार्यः वात्स्यानोऽपि (सामान्ययुगस्य चतुर्थशतमानम्) तन्त्रयुक्तीनां विषये परिचयवानासीत्। न्यायसूत्राणां प्रथमाध्यायस्य प्रथमाह्निकस्य चतुर्थसूत्रस्य विवरणावेलायां वात्स्यायनाचार्येण 'अनुमत'-तन्त्रयुक्तेः प्रयोगः कृतः।[18]

विष्णुधर्मोत्तरपुराणे तृतीयखण्डे षष्ठेऽध्याये द्वात्रिंशत् तन्त्रयुक्तीनामुल्लेखः विद्यते। अस्य ग्रन्थस्य कालः सामान्ययुगस्य प्रायः पञ्चम-सप्तम-शतमानयोः मध्यपाती।[19]

युक्तिदीपिका आचार्येण ईश्वरकृष्णकृष्णेन कृतायाः साङ्ख्यकारिकायाः उपरि विचचिता काचित् टीका। इयं टीका सामान्ययुगे षष्ठशतमानीया इति परिगण्यते।[20] अस्याः टीकायाः आरम्भे अष्ट-युक्तीनाम् उल्लेखः कृतः। टीकाकारः ताः युक्तीः तन्त्रसम्पत्, तन्त्रगुणाः, तन्त्रयुक्तिः इति नामभिः विविधम् अभिदधाति।

श्रीमच्छङ्करभगवत्पादाः अपि 'अनुमत'तन्त्रयुक्तेः प्रयोगमकार्षुः ब्रह्मसूत्रभाष्ये। (२.४.१२) शङ्करभगवत्पादानां च कालः सामान्ययुगात् प्राक् षष्ठशतमानाम्[21], सामान्ययुगे अष्टमशत-मानमिति च[22] बहुधा कथ्यते।

आचर्येण नीलमेघभिषजा (सामान्ययुगे नवमशतमानम्) रचितः "तन्त्रयुक्तिविचारः" इति ग्रन्थः तन्त्रयुक्तिविषये रचितः कश्चित्

[17] Lele, 2006,p.12 [18] Jha, 2009, p.165 [19] Lele, 2006, p.13 [20] Larson & Bhattacharya,1987, p.228 [21] Sastry, 1971 [22] Menon , 2004

स्वतन्त्रः ग्रन्थः। अस्मिन् गन्थे युक्तीनां निर्वचनानि, उदाहरणानि च चरकसंहितानुसारीणि दृश्यन्ते। अस्मिन् गन्थे षट्त्रिंशत् तन्त्रयुक्तीनामुल्लेखः विद्यते।[23]

तन्त्रयुक्तीनां विषये "तन्त्रयुक्तिः" इत्याख्यः कश्चिदन्यः अज्ञातकर्तृकः स्वतन्त्रग्रन्थोऽपि विद्यते। आन्तरिकैः प्रमाणैः ज्ञायते यत् अयं ग्रन्थः तन्त्रयुक्तिविचारग्रन्थस्य उत्तरकालीनः प्रायः, दशमशतमानीयश्च इति।[24] अत्रापि ग्रन्थे तन्त्रयुक्तीनां निर्वचनमस्ति, आयुर्वेदस्रोतसः उदाहरणानि च सन्ति।

ईश्वरप्रत्यभिज्ञाविविवृतिविमर्शिनी, स्वच्छन्दतन्त्रं वामकेश्वरीमत-विवरणम् इत्यादिषु तन्त्रशास्त्रग्रन्थेष्वपि कासञ्चन तन्त्रयुक्तीनां विवरणमस्ति॥ एतेषां ग्रन्थानां कालः प्रायः ११-१२ शतमानस्य परितः विद्यते।[25]

इत्थञ्च सामान्ययुगात् पूर्वं चतुर्थशतमानादारभ्य सामान्ययुगस्य द्वादशशतमानपर्यन्तं संस्कृतवाङ्मये तन्त्रयुक्तीनां प्रयोगः प्रदृश्यते। (प्रायः १६०० वर्षाणि)। द्वादशशतमानात्परं विद्यमानाः तन्त्र-युक्तीनामुल्लेखाः एतावता नोपलब्धाः, अन्वेष्टव्याश्च विद्यन्ते। अत्रेदमवधेयं यत् ईश्वरप्रत्यभिज्ञाविविवृतिविमर्शिनी काश्मीरप्रदेश-सम्बद्धा। नीलमेघभिषक् यश्च तन्त्रयुक्तिविचाराख्य-ग्रन्थप्रणेता सः केरलीयः। तस्मात् केरलात् काश्मीरपर्यन्तं तन्त्रयुक्तेः भौगोलिकः प्रसारः अपि दृश्यते। तस्मात् देशतः कालतश्च तन्त्रयुक्तीनां वैशिष्ट्यं विस्तारश्च अनेन परिज्ञातः भवति। अपि च अर्थशास्त्रम्,

[23] Lele, 2006,p.14 [24] Lele, 2006, p.15 [25] Jayaraman, 2009, pp.99-102

वैद्यकीयशास्त्रम्, पुराणम्, तन्त्रशास्त्रम्, वेदान्त-न्याय-साङ्ख्यादि-दर्शनानीति विविधशास्त्रीयग्रन्थेषु तन्त्रयुक्तीनामुपयोगः अस्याः पद्धत्याः सर्वशास्त्रसाधारणत्वं प्रदर्शयति।

**संस्कृतेतर-साहित्यस्रोतस्सु तन्त्रयुक्तयः**

तन्त्रयुक्तीनां प्रयोगः न केवलं संस्कृतग्रन्थेषु, किन्तु तमिल्-पाली-ग्रन्थेष्वपि साक्षात् परोक्षतश्च समुपलक्ष्यते। तस्य सङ्क्षिप्तं विवरणमधः प्रदीयते।

**तमिल्-ग्रन्थाः**

(i) तोल्काप्पियम्-इत्याख्ये प्राचीने तमिल्-ग्रन्थे तन्त्रयुक्तीनामुल्लेखः उपयोगश्च विद्यते।[26] कौटिल्यार्थशात्र इव अत्रापि ग्रन्थे ३२ तन्त्रयुक्तयः सन्ति। किन्तु, विदुषां मतमस्ति यत् २२ तन्त्रयुक्तयः एव ग्रन्थद्वयसाधारणाः(तोल्काप्पियम्-आर्थशास्त्रम्) इति।[27] तोल्काप्पिय-ग्रन्थस्य कालः प्रायः सामान्ययुगे प्रथमशतमानमिति विचारः अस्ति।[28]

(ii) नन्नूल्-इत्यपरः तमिल् व्याकरणग्रन्थः यत्र ३२ तन्त्रयुक्तयः उपलभ्यन्ते। अयं ग्रन्थः पवनन्दी-मुनिना रचितः। अस्य ग्रन्थस्य तन्त्रयुक्तीनां विवरणं पूर्वतनस्य तोल्काप्पिय-ग्रन्थस्य विवरणाद्भिद्यते। नन्नूल्-ग्रन्थस्य कालः सामान्ययुगस्य द्वादश-शतमानमिति परिगण्यते।[29]

तमिल्साहित्यसम्प्रदाये इतरेऽपि ग्रन्था विद्यन्ते यत्र तन्त्रयुक्तीनामुल्लेखः उपयोगश्च उपलभ्यते। तेषु केचन ग्रन्थाः

---

[26] पोरुलधिकारम्, मरपियल्, सूत्रम् ६६५ [27] दीक्षितर्, 1930, p.82 [28] Zevelebil, 147,1973
[29] Swamy,1975 p.295

इत्थम् - याप्परुङ्गल-कारिगै (१२ शतमानम्) मारन्-अलङ्कारम् (१६ शतमानम्), इलक्कण-विळक्कम् (१७ शतमानम्), स्वामिनाथम् (१८ -१९ शतमानम्) ।[30]

एते ग्रन्थाः काव्यं, व्याकरणं, छन्दः इत्येवमादिशास्त्रसम्बद्धाः सन्ति। संस्कृतग्रन्थपरम्परायां तन्त्रयुक्तीनामुल्लेखस्य अवसानं द्वादशशतमाने दृष्टम्। किन्तु अवधानार्हमिदं यत् तमिल्साहित्य-परम्परायां तन्त्रयुक्तीनां समुपयोगः १८-१९शतमानेऽपि दृश्यत इति ॥

**पाली-ग्रन्थेषु तन्त्रयुक्तयः**

ग्रन्थरचनं तद्व्याख्यानम् इत्येतदर्थं पालीग्रन्थसम्प्रदाये द्वौ कार्यप्रणालीग्रन्थौ परिदृश्येते - पेटकोपदेश-नेतिपकरनाख्यौ। एतौ ग्रन्थौ तन्त्रयुक्तीनां विषये बौद्धानां विचारं प्रतिपादयन्ति इत्यभिप्रैति वाड्नर् ।[31]

संस्कृतेतर-साहित्येष्वपि विद्यमानः तन्त्रयुक्तीनामुपयोगः प्रभावश्च तन्त्रयुक्तीनामाधारेण भारतीय-साहित्यपरम्पराणामन्तस्स्रोतसामध्य-यनम् अनुसन्धानम् इत्येतत् नूतनं क्षेत्रमेव समुद्घाटयति।

**व्यवस्थित-ग्रन्थ-रचनार्थं मूलभूतानां पद्धतीनां सङ्ग्रहः तन्त्रयुक्तिषु**

अधुना, व्यवस्थितस्य कस्यचन ग्रन्थस्य रचनार्थम् अपेक्षितानां मूलभूतानां पद्धतीनां सङ्ग्रहः तन्त्रयुक्तिषु विद्यते इति यत्प्रतिज्ञातं तद्यथामति निरूप्यते –

[30] Jayaraman, 2009, 184-191 [31] वार्डनर, 2000, p.319

**ग्रन्थस्य मूलस्वरूप-संरचनाय युक्तयः**

सर्वेणापि ग्रन्थकर्त्रा ग्रन्थस्य प्रारूपं स्वरूपं च परिनिष्ठितं करणीयं, येन च विचाराः सङ्गतिबद्धतया प्रस्तोतुं शक्याः। एतादृशे कर्मणि नाना तन्त्रयुक्तयः सहकुर्वन्ति। तासु - प्रयोजनम्, अधिकरणम्, विधानम्, उद्देशः, निर्देशः इतीमाः उदाहारणत्वेन उल्लेखितुमर्हाः।

**सिद्धान्तानां नियमानाञ्च कथनाय युक्तयः**

अनुसन्धानम्, अवलोकनं, चिन्तनम् इत्यादिकं विधाय यः कश्चिदपि ग्रन्थकृत्, साहित्यविषये वा, वैज्ञानिकेषु विषयेषु वा सिद्धान्तान् नियमान् वा कथयितुं प्रयतते। तन्त्रयुक्त्यावल्यां तादृश्यः युक्तयः सन्ति याः सिद्धान्तानां नियमानां च कथनाय ग्रन्थकृते सहकारं विदधति। तद्दिशि - नियोगः (अपरिवर्तनीय-नियमः), अपवर्गः (अपवादः), विकल्पः (वैकल्पिकनियमः), उपदेशः (कर्तव्याकर्तव्यविषये बोधनम्) इत्येवमादिकाः युक्तयः उदाहार्याः।

**व्याख्यान-सहकारिण्यः तन्त्रयुक्तयः**

संस्कृते काचिदुक्तिः अस्ति "न केवला हि प्रतिज्ञा प्रतिज्ञातमर्थं साधयेद्" इति। एवमेव केवलं नियमनां कथनं, सिद्धान्तानां सङ्कल्पः एव तन्निरूपकः न भवति। तस्य व्यवस्थितम् उपस्थापनं, युक्तियुक्तं प्रतिपादनं, विशदं व्याख्यानं च करणीयं भवति। तदेव हि सिद्धान्तानां नियमानां वा ग्राह्यताप्रयोजकं भवति। तादृश्यामपि क्रियायां तन्त्रयुक्तयः सहकुर्वन्ति। निर्वचनम्,

अपदेशः, पूर्वपक्षः, उत्तरपक्षः, दृष्टान्तः इत्याद्याः युक्तयः तादृशयुक्तिषु अन्तर्भवन्ति ।

**ग्रन्थानां भाषाशैलीपरिष्काराय तन्त्रयुक्तयः**

सैद्धान्तिक-वैज्ञानिक-ग्रन्थानां रचनसन्दर्भे यथा ग्रन्थस्वरूपं, नूतनसिद्धान्तकथनं, तस्य उपोद्बलक-युक्त्युपन्यासः इत्येतत्सर्वं प्रमुखं तथैव भाषाशैली अपि। भाषाशैल्यां परिष्कृतायां सत्यां ग्रन्थः नितरां ग्राह्यत्वमश्नुते। भाषायाः सुष्ठुप्रयोगेण अध्येतॄणां मनसि ग्रन्थस्थप्रतिपाद्यविषये अभिरुचिः उत्पादयितुं शक्या। अतः परिष्कृतायाः, निष्कृष्टायाश्च भाषायाः प्रयोगः वैज्ञानिक-सैद्धान्तिक-ग्रन्थेषु नितरामपेक्षिता। भाषाशैलीपरिष्कर्त्रीषु इमाः अपि तन्त्रयुक्तयः अन्यतमाः - वाक्यशेषः, अर्थापत्तिः, समुच्चयः, अतिक्रान्तावेक्षणम्, अनागतावेक्षणम् इत्यादि ।

**यावान् ग्रन्थः तावत्यः तन्त्रयुक्तयः**

अधोलिखितम् आचार्यस्य चरकस्य वचनं महत्त्वमावहति - (८.१२.४५-६)

> तन्त्रे समासव्यासोक्ते भवन्त्येता हि कृत्स्नशः ।
> एकदेशेन दृश्यन्ते समासाभिहिते तथा ॥

"अर्थात् - इमाः तन्त्रयुक्तयः ग्रन्थेषु विस्तरेण समासतश्च उपयोक्तुं शक्याः। किन्तु सङ्क्षिप्ते ग्रन्थे युक्त्यैकदेशेनापि कार्यनिर्वाहः भवति इति ।

डा.के.वी.शर्मा एनमेव चरकोक्तं विचारं स्फुटयति - "उपर्युक्ताः सर्वाः युक्तयः सर्वेषु ग्रन्थेषु सामस्त्येन प्रयुक्ताः भवेयुः इति नार्थः ।

किञ्च स एव क्रमः अनुसर्तव्यः इत्यपि नास्ति। एताः युक्तयः सन्दर्भानुसारं यथायोग्यं ग्रन्थेषु प्रयोक्तव्याः, उपयोक्तव्याः इत्येतदेव समुद्दिष्टम् ॥"[32]

अतः ग्रन्थप्रणेता स्वग्रन्थस्य याथार्थ्यं मनसि निधाय तेन उपयुज्यमानानां युक्तीनाम् इयत्तां स्वयं विनिर्णीय अग्रे सर्तुमर्हति। प्रायः इयं ग्रन्थरचनानुकूला तन्त्रयुक्तीनां प्रकृतिः प्रायः १६०० पर्यन्तं संस्कृतग्रन्थप्रणेतृभिः तन्त्रयुक्तीनामनुसरणे प्रेरिका इति मन्तुं शक्येत। इयमेव ग्रन्थस्वभावानुकूलयुक्तिप्रयोग-प्रणाली भारते वैज्ञानिक-सैद्धान्तिक-सम्पत्समृद्धेः निदानमित्यपि निस्संशयं वक्तुं शक्यते।

**उपसंहारः**

प्राचीनभारते अन्येऽपि बहवः ग्रन्थाः तन्त्रयुक्त्याधारेण रचिताः स्युः।अस्यां दिशि अध्ययनमारब्धप्रायं विदुषां मध्ये। अत्र बहु कर्तव्यमवशिष्यते। एतद्विषये लेले-वर्यः कथयति[33] "तन्त्रयुक्तिपद्धत्याः आधुनिकानुसन्धान-पद्धत्या सह तुलनात्मक-मध्ययनं कर्तव्यम्"इति।अनेन भारते अनुसन्धानकार्ये विशिष्टः दिशानिर्देशः प्राप्येत, स्वदेशीयत्वात्।तन्त्रयुक्तीनां सहकारेण प्राचीनानाम् अर्वाचीनानां च ग्रन्थानां रचनात्मकविश्लेषणं (structural analysis) कर्तुं शक्येत, येन च तेषां ग्रन्थानां योगदानं, वैशिष्ट्यं स्पष्टं ज्ञायेत। एतदतिरिच्य, भारते इतर-साहित्यस्रोतस्स्वपि तन्त्रयुक्तयः विद्यन्ते इति प्रदर्शितम्। तत् तन्त्रयुक्तिसूत्रं गृहीत्वा समग्रस्य भारतीय-साहित्यस्य अन्तस्स्रोतसां,

[32] Sharma, 2006, p.31-32 [33] Lele, 2006, p.264

मिथः प्रभावाणां च सुष्ठु अध्ययनं भवितुमर्हति । तस्मात् अनुसन्धान-पुरस्सरं सुष्ठुप्रयुक्ताः तन्त्रयुक्तयः प्राचीनार्वाचीनचिन्तनानाम्, भारतीय-पाश्चात्य-चिन्तनानां, भारतीयानामेव बहूनां चिन्तनस्रोतसां च मध्ये सुदृढः कश्चित् वैचारिकसेतुः भवितुमर्हति ॥

## References


1. Dishitar, V.R.Ramchandra, (1930), "Tantrayukti" The Journal of Oriental Research,Vol.4, Kuppuswami Shastri Research Institute, Chennai
2. Jayaraman, M. (2009), The Doctrine of Tantrayukti – A Study, Ph.D. thesis Submitted to the University of Madras
3. Jha, D.N, (2009), Ancient India , In historical Outline,Manohar Publishers and Distributors, New Delhi
4. Larnson, Geral James & Bhattacharya, Ramshankar, (1987) The Encyclopedia of Indian Philosophies, Volume 4: Samkhya, A Dualist tradition in Indian Philosophy, Princeton University Press, Princeton, New Jersey.
5. Lele, W.K, (2006), Methodology of Ancient Indian Sciences, Chaukhamba Surabharati Prakashan, Varanasi
6. Menon Y. Keshava, Reprint (2004), The Mind of Adi Shankaracharya, Jaico Publishing House, Mumbai
7. Mittal, Surendra Nath, (2000), Kautilya Arthashastra Revisited, PHISPC, New Delhi

8. Muthuswamy, N.E., (1974), Tantrayuktivicāra, Publication Division, Government Ayurveda College, Trivandrum.
9. Narayan Ram, Acharya Kavya Tirtha (1945) Suśrutasaṃhitā, Nirnaya Sagar Press, Bombay
10. N.R.Bhat, (1964), Ajitagama, Volume 1, Institut Francais D'Indologie, Pondicheri
11. Obberhammer, Gerhard (1968), "Notes on Tantrayukti-s", The Adyar Library Bulletin, Vol. 31,pp.600-611
12. Sastry, Narayana, Reprint (1971) The Age of Sankara, B.G.Paul and Co, Madras
13. Sengupta, Kaviraja Narendranath, Sengupta, Kaviaraja Balaichandra (1933), Carakasaṃhitā carakacaturānanaśrīmaccakrapāṇidattapraṇītayā Āyurvedadīpikākhyaṭīkayā mahāmahopādhyāya śrīgaṅgādharakaviratnavirājaviracitayā jalpakalpatarusamākhyayā ṭīkayā ca samalaṅkṛtā, C K Sen and Company, Kolkatta
14. Sharma, shankara (1949), Tantrayukti, Vaidyasarathi Press, Kottayam
15. Sharma, K.V (2006), Science of Ancient India: Certain Novel Facets In Their Study, (An Article) (Muraleemadhavan, P.C. & Sundareswaran, K. (2006), Sanskrit in Technological Age, New Bharatiya Book Corporation, New Delhi.)
16. Shamashastrary, R. (1915), Arthaśāstra, Government press, Bangalore

17. Solomon, Esther (1978), Indian Dialectics: Methods of Philosophical Discussions, B. J. Institute of Learning and research, Ahmedabad
18. Swamy, B.G.L., (1975), The Date of Tolkappiyam: A Retrospect, Annals of Oriental Research (Madras), Silver Jubilee Volume.
19. Vidyabhushana, Dr. Satis Chandra (1921), A History of Indian Logic, Motilal Banarsidas, Calcutta
20. Wardner, A.K, (1998), Indian Buddhism, Moitilal Banarsidas, New Delhi
21. Zvelebil, Kamil (1973), The smile of Murugan on Tamil literature of South india, Leiden EJ Brill, Netherlands

6

## न्यायमतरीत्या कालः

भास्करभट्टः जोशि

“चिदचित्कालनात्कालः गुणैरात्मनि चेदृशै”[1] इति, “कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः इति[2]”, कालः सृजति भूतानि कालः संहरति प्रजाः” । कलनात्सर्वभूतानां स कालः परिकीर्तितः । इति च श्रूयते लोके ।

इत्थमपि-

अतीतो पटः इति, भविष्यति वर्षा इति, वर्तते घटः इति च व्यवहाराः लोके दृष्टाः । व्यवहारो नाम शब्दप्रयोगः । वर्तते, अतीतः, भविष्यति इति शब्दानां च अर्थ एव कालः ।

अत एव उक्तम्- “अतीतादिव्यवहारहेतुः कालः”[3] इति ।

मुक्तावल्यां कालस्य निरूपणम् इत्थम्-

“जन्यानां जनकः कालो जगतामाश्रयो मतः"[4] इति

जन्यानां कार्याणां निमित्तकारणं यः सैव कालः । कार्यमात्रं प्रति कालः न समवायिकारणं, नापि असमवायिकारणं द्रव्यत्वात् । अतः एव कार्याणां प्रति कालः निमित्तकारणमेव भवति । अत्र प्रश्नः, कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किं प्रमाणम्? इति चेत् उच्यते, “तदुत्पत्त्यधिकरणस्य तदुत्पत्तिहेतुत्वं, तदुत्पत्तिहेतोश्च तद्धेतुत्वमिति” नियम एव प्रमाणम् ।

---

[1] निरुक्तिः । [2] भ. गीता । ११-३२ [3] तर्कसंग्रहः [4] मुक्तावली- का. सं- ४५, प्रत्यक्षखण्डः, पृ सं-१५०

अस्तु कालस्य अस्तित्वे किं प्रमाणम्? इति चेत् “जगतामाश्रयो मतः” इति। सर्वपदार्थानाम् आश्रयः कालः इति। एवं च “कालः कालिकेन सर्ववानिति” प्रतीत्या सर्वाधिकरणत्वेन कालाख्यद्रव्यसिद्धिरित्याशयः।

अस्मिन्नेव विषये काचित् अज्ञातकर्तृकेन विरचितमातृका प्राप्ता। अस्याः मातृकायाः विवरणम् इत्थम्-

कर्ता - अज्ञातकर्तृकम्।

लिपिः - तेलगुलिपिः।

लिप्यासनम् - कागजपत्रम्

पुटानि - ४ पुटानि, १४ पङ्क्तयः।

प्राप्तस्थानम् - अडियार् लय्ब्ररी, चैन्नै।

क्र. सं - १५९०

एतादृश्याः मातृकायाः सम्पादनं विहितमस्ति। अस्यां मातृकायां ये दोषाः आसन् ते वारिताः। सुबोधाय तत्र तत्र कानिचन पदानि वाक्येषु कल्पितानि। [] अनेन चिह्नेन तानि पदानि सूचितानि।{} अनेन चिह्नेन मातृकायां विद्यमानः पाठः प्रदर्शितः।

॥श्रीहयवदनाय नमः॥

जगदाधारः काल इति प्राञ्चः। तच्चिंत्यम्। कालस्य जगदाधारत्वे मानाभावात्। न चेदानीं जगदिति प्रतीत्या जगदाधारत्वं सिद्धमिति [वाच्यम्]। तादृशप्रतीतेः कालजगतोः सम्बन्धविषय-कत्वेनतदधिकरणत्वविषयत्वाभावात्। अन्यथा कालस्य सर्वाधारत्वे घटत्वपटत्वाद्यधिकरणत्वेन घटपटादिशब्दवाच्यत्वप्रसङ्गात्। तत्पद-

प्रवृत्तिनिमित्ताधिकरणत्वस्य तत्पदवाच्यत्वप्रयोजकत्वात्। {इति} [न च] समवायेन तत्पदप्रवृत्तिनिमित्ताधिकरणत्वं तत्पदवाच्यत्वे प्रयोजकं, न तु तत्पदप्रवृत्तिनिमित्ताधिकरणत्वमात्रं, अतो न दोष इति वाच्यम्। एवं सति समवायादीनां समवायपदवाच्यत्वानुपपत्तेः। समवायेन समवायत्वाद्यनधिकरणत्वात्।

न च तथापि जगदाधारतानिर्वाहकसम्बन्धातिरिक्तसम्बन्धेन तत्पद-प्रवृत्तिनिमित्ताधिकरणत्वं तत्पदवाच्यत्वे प्रयोजकम्। अतो न समवायस्य समवायपदवाच्यत्वानुपपत्तिः। जगदाधारतानिर्वाहक-सम्बन्धातिरिक्तस्वरूपसम्बन्धेन समवायत्वाधिकरणत्वात्। नापि कालस्य घटादिपदवाच्यत्वापत्तिः। जगदाधारतानिर्वाहक-सम्बन्धेनैव घटत्वपटत्वाधिकरणत्वादिति वाच्यम्। एवं सति भूतलादीनामपि घटादिपदवाच्यत्वप्रसङ्गात्, स्वसंयुक्तसमवायसम्बन्धेन घटत्वा-धिकरणत्वात् कालस्यापि कालपदवाच्यत्वानुपपत्तिः। जगदाधारता-निर्वाहकसम्बन्धे नैव तस्य कालत्वाधिकरणतया तद्भिन्नसम्बन्धेन तदनधिकरणत्वात्।

नच काले कालत्वस्य जगदाधारतानिर्वाहकसम्बन्धातिरिक्तसम्बन्धेनापि प्रवृत्तिरस्ति इति न तस्य तत्पद{पर}वाच्यत्वानुपपत्तिरिति वाच्यम्। प्रमाणाभावादेकत्रैव एकस्य सम्बन्धद्वयेन{प्र}वृत्तेः क्वाप्यदर्शनाच्च। तथात्वे कालसम्बन्धस्य स्वरूपसम्बन्धत्वानुपपत्तिश्च। सम्बन्धा-न्तरमन्तरा विशिष्टप्रत्ययजनकत्वस्याभावात्। तस्मात् स्वावच्छेदक-सम्बन्धेन प्रवृत्तिनिमित्ताधिकरणत्वमेव तत्पदवाच्यत्वप्रयोजकमिति कालस्य जगदाधारत्वे [स्वावच्छेदकसम्बन्धेन जगदाधारत्वात् घटादिशब्दवाच्यत्वापत्तिः।]

अपि च कालस्य सर्वाधारत्वे कार्यकारणभाव एव लोके दुर्ग्रहः स्यात्। अतिप्रसक्तत्वेन तादृशावच्छेदकधर्माभावात्। समवायेन अनतिप्रसक्तत्वविवक्षायां च प्रमेयत्वादेरप्यवच्छेदकत्वाप्रसङ्गात्। कालिकासम्बन्धातिरिक्तसम्बन्धेन अनतिप्रसक्तित्वविवक्षायां च कालत्वस्याप्यनतिप्रसक्तत्वापातात्।

किञ्च कालस्य सर्वाधारत्वेऽवृत्तिपदार्था{भेद}भावप्रसङ्गात्। सर्वस्यापि तद्वृत्तित्वावश्यकत्वात्। नच तद्भिन्नसर्वाधारत्वमेव कालस्य तद्घटित-सर्वाधारत्वमिति न तदवृत्ति{त्व}पदार्था{वभेद}भावप्रसङ्ग इति वाच्यम्। विनिगमकाभावात्। प्रतीतेरुभयत्राप्यविशेषात्। तस्मात् कालस्य सर्वाधारत्वसम्भवेन तत्प्रतीतेस्तत्सम्बन्धमात्रविषयत्वमङ्गी-करणीयम्। न तत्सम्बन्ध[व]त्वेन च तदधिकरणत्वं सिध्यति। अतिप्रसङ्गात्।

अपि च सर्वाधारत्वं महाकालस्य क्षणलवादिकालस्य वा। नाद्यः। इदानीमिति प्रतीतेः क्षणकालविषयत्वेन महाकालविषयकत्वाभावात्। अन्यथा इदानीं घट इति प्रतीतेः घटेप्यसाधनज्ञानत्वेन घटप्रत्य-यानापत्तेः। तद्घटज्ञानस्य महाकालविषयत्वेन एतत्कालावच्छिन्न-त्वरूपवर्तमानत्वावगाहित्वाभावेन विषयसत्तारूपनिश्चयत्वाभावात्। न द्वितीय्यः। इदानीं कालस्य क्षणरूपस्य क्षणान्तरकालीनपदार्थान्त-रानधिकरणत्वात् इदानीं कालस्य घटतदभावोभयाधिकरणत्वे इदानीं काले घटो नास्तीत्यापत्तेश्च त[त्प]दवाच्यत्वापत्तिः दुर्वारैव।

किञ्च कालस्य सर्वाधिकरणत्वे सर्वाधिकरणत्ववर्णनमेव निष्प्रमाणं स्यात्। काले सर्वाधिकरणत्वस्येव तदभावाधिकरणत्वस्यापि सत्वेन

सर्वाधिकरणत्वप्रतीतेः तदभाववति तद्विशेष्यकभ्रमरूपत्वात् । नच न तदभाववति तद्विषयकत्वमात्रं न भ्रमत्वं तथा सति अव्याप्यवृत्तिसंयोगादिप्रतीतेः भ्रमत्वापातात् । किन्तु प्रतियोग्यसमानाधिकरणतदभाववति तद्विषयकत्वम् । तथाच काले सर्वाधिकरणत्वप्रतीतेः प्रतियोगिसमानाधिकरणसर्वाधिकरणत्वाभाववति सर्वाधिकरणत्वविषयकत्वेन तादृशविशिष्टस्यैव असत्वान्न भ्रमत्वमिति वाच्यम् । कालस्य सर्वाधिकरणत्वं वावदतो तव मते प्रतियोग्यसमानाधिकरणाप्रसिध्या लक्षणाप्रसिद्धिस्स्यात् । न च कालभिन्नाधिकरणे प्रतियोग्यसामानाधिकरण्यं विवक्षितम् । अतो नात्र दोष इति वाच्यम् । एवं सति काले सर्वाधिकरणत्वप्रतीतेः भ्रमत्वापातात् । सर्वाधिकरणत्वाभावस्य कालभिन्नाधिकरणे प्रतियोग्यसमानाधिकरणत्वात् ।

नच तथाप्यारोप्यसम्बन्धेन प्रतियोग्यसामानाधिकरण्यं विवक्षितम् । अतो नाप्रसिद्धिरिति वाच्यम् । एवं सति संयोगीति प्रतीतेः भ्रमत्वापातात् । संयोगस्यावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वे अपि आरोप्यसम्बन्धेन प्रतियोगिव्यधिकरणत्वात् । अग्रे संयोगीति प्रतीतेः भ्रमत्वाभावप्रसङ्गाच्च, संयोगाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् । नच क्वचित्प्रतियोग्यसमानाधिकरण्यमेव विवक्षितम् अतो नातिप्रसङ्ग इति वाच्यम् । एवं सति संयोगीति प्रतीतेः भ्रमत्वापत्तेः दुष्परिहारत्वात् । तस्माद्यवच्छे{दके}देन यत्र यन्नास्ति तदवच्छेदेन तद्विषयकत्वमेव भ्रमत्वं वाच्यम् । [तस्मात्] कालस्य सर्वाधारत्वे सर्वाधारत्वप्रतीतिभ्रान्त्यैवेति । तस्मात्कालस्य सर्वाधिकरणत्वं {संसर्गत्वेति} संसर्गविषयकत्वमेवेति प्राचां पक्षोऽदक्ष इति दिक् । कालस्य सर्वाधारताविचारः समाप्तः ॥

7

## दैवधातुपाठोक्ता ज्ञाधातु-क्षिधातुविषयिणी समीक्षा

डा. उदयन हेगडे

### उपोद्घातः

पाणिनीयः धातुपाठः सर्वैः अपि विदितः एव। कातन्त्र-चान्द्र-जैनेन्द्र-शाकटायन-हैमप्रभृतीनां शब्दानुशासनानां प्रवक्तारः स्वं स्वं धातुपाठम् अवदन् एव। तेषु पाणिनीयधातुपाठः तु अनितरसाधारणत्वात् गच्छता कालेन सर्वैः आदृतः जात। तस्य धातुपाठस्य व्याख्यानानि अपि बहूनि विरचितानि। तेषु केषाञ्चिदेव नामानि उपलभ्यन्ते। बहूनां तु नामानि अपि न ज्ञायन्ते। अद्यत्वे उपलभ्यमानेषु पाणिनीयधातुपाठवृत्तिषु माधवीयधातुवृत्तिः (सायणाचार्यविरचिता), क्षीरतरङ्गिणी (क्षीरस्वामिविरचिता), धातुप्रदीपः (मैत्रेयरक्षितविरचितः) इत्यादयः प्रमुखाः। सिद्धान्तकौमुद्यादिषु योऽयं धातुपाठः उपलभ्यते सः सायणाचार्येण परिष्कृतः इति अभिप्रैति युधिष्ठिरमीमांसकः। धातुवृत्तयः बह्व्यः सन्ति इति पूर्वम् उक्तं ननु? प्रतिवृत्ति धातुपाठे भेदः अंशतः दृश्यते एव। अतः एव कौमुद्यादिषु 'इत्येके' 'इत्यन्ये' इत्यादिभिः वाक्यैः विविधधातुवृत्तिकाराणां मतमपि तत्र तत्र उल्लिख्यते।

### दैवम्

देवः इति कश्चन धातुवृत्तिकारः। अनेन दैवम् इति नाम्ना कश्चन धातुपाठग्रन्थः विरचितः। पाणिनीये धातुपाठे पुनःपठितानां

सरूपाणां धातूनाम् असकृत्पाठफलनिर्देशकः द्विशतपद्यमितः ग्रन्थः एव 'दैवम्' इति प्रसिद्धः। अस्मिन् ग्रन्थे 200 कारिकाः विद्यन्ते। तेषां विभिन्नेषु गणेषु कथनस्य किं प्रयोजनम् इति विषयः चिन्तितः। "इत्यनेकविकरणसरूपधातुव्याख्यानं देवनाम्ना विरचितं दैवम्" इति स्वयं ग्रन्थकारः उल्लिखति। सदृशधातूनां सङ्ग्रहे प्रवृत्तः अयं ग्रन्थकारः। अस्याः धातुवृत्तेः श्रीकृष्णलीलाशुक-मुनिप्रणितं 'पुरुषकार'वार्तिकरूपं व्याख्यानं विद्यते। 'देवसहायः पुरुषकारः' इति श्रीकृष्णलीलाशुकमुनिः स्वयं वदति। 'बली पुरुषकारो हि दैवमप्यतिवर्तते' इति वचनं अस्याम् पुरुषकारव्याख्यायाः वैशिष्ट्यं प्रतिपादयति।

अस्य ग्रन्थस्य प्रयोजनं पद्यबन्धनप्रयोजनञ्च ग्रन्थादौ स्वयं ग्रन्थकर्त्रा इत्थं प्रत्यपादि -

पठितस्य पुनःपाठे फलं वृत्तेन वक्ष्यते। न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम्॥

धातूनां पुनःपाठफलं चात्र ग्रन्थकर्त्रा क्वचिद् धातुस्वरूपप्रदर्शनेन, क्वचित् तदर्थस्य उपन्यासेन, क्वचित् विकरणसहकारेण, क्वचित् द्वाभ्यां समस्तैर्वोपायैः सह लट्लङ्लिङां रूपभेदं प्रदर्श्य प्रायेण सूच्यते। क्वचित् प्रत्यक्षवचनेनाप्युच्यते। यथा - स्वरभेदाद् द्विरुच्यते[1], इटा भिदा [2] इत्यादि। न च अत्र केवलं तेषामेव भूप्रभृतीनां धातूनां पुनःपाठफलं ग्रन्थकृता प्रदर्श्यते ये सर्वात्मना सरूपाः, अपि तु सत्यपि प्रयोगकाले नुमादिना वैरूप्ये धातुपाठ उपदेशावस्थायाम् अनुबन्धपरित्यागे ये समानरूपा

[1] दैवम् ५५ [2] दैवम् ११६

पठ्यन्ते, सत्यपि च उपदेशावस्थायां वैरूप्ये प्रयोगकाले येषां प्रायेण सारूप्यमुपलभ्यते, तेऽप्यत्र ग्रन्थकारेण सङ्गृह्यन्ते। यथा - उपदेशे सदृशाः प्रयोगे विसदृशा अक-अकि-प्रभृतयः। अनयोः प्रयोगकाले अकेत् अङ्केत् इति रूपभेदो भवति[3]। पाठे विरूपाः प्रयोगे क्वचित् सदृशाः णिदृ-णेदृ-प्रभृतयः। अनयोरुपदेशे सत्यपि रूपभेदे लिड्व्यतिरिक्तेषु लकारेषु नेदते नेदिष्यते इत्येवं समाना एव प्रयोगा भवन्ति। लिटि तु निनदे निनेदे इत्येवं रूपभेदः[4]। सरूपा अपि सर्वे धातवो नात्र ग्रन्थकृता विवृताः। प्रायेणैव हि तेषां सङ्ग्रहो व्यधायि। भूयसां विवरणात् अनिर्दिष्टानामपि धातूनां निर्दिष्टदिशैव पुनःपाठफलज्ञानं सुकरम् इति हि ग्रन्थकर्तुः अभिप्रायविशेषः।

तदुक्तं ग्रन्थकर्त्रा देवेन -

सरूपा धातवः केचिद् अनुक्ता अपि सन्ति चेत्। सन्तूक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे॥ इति।

अत्र ग्रन्थकारेण यथासम्भवं मातृकाक्रममाश्रित्यैव धातूनां सङ्कलनं विहितम्। सत्यप्येवं भूधातोः प्रथमं पाठः पूर्वेषामनुरोधेन, भूशब्दस्य सत्ताख्यब्रह्मवाचकत्वेन मङ्गलरूपेण वा कृतः स्यात्।

**देशः, कालः च**

दैवेन स्वीये ग्रन्थे नैतादृशः कश्चित् सङ्केतः कृतो येन तद्देशकालादिविषये किञ्चिज्ज्ञानं भवेत्। अतो देवोऽयं कस्मिन् काले कं च भूभागं स्वजनुषा अलञ्चकारेति न याथातथ्येन वक्तुं शक्यते, तथापि ग्रन्थोद्धरणपरम्परया यथानुमातुं शक्यं, तत्तु इत्थम् - दैवग्रन्थस्य पूर्वसम्पादकेन पण्डितगणपतिशास्त्रिणा

---

[3] दैवम् ४१ [4] दैवम् ११४

देवः क्रैस्ताब्दीयस्य नवमशतकस्य द्वादशशतकस्य च अन्तराले स्थित इति शक्यं कल्पयितुम् इति सामान्येनोक्तम्। संस्कृतव्याकरणशास्त्र का इतिहास इत्याख्ये ग्रन्थे च देवस्य कालो वैक्रमाब्दस्य द्वादशशत्या उत्तरार्ध इति निर्णीतम्। तदेव सङ्क्षेपत इहाप्युच्यते-

1. क्षीरस्वामी धातुपाठविषयकान् पाणिनीयान् अपाणिनीयांश्च बहून् ग्रन्थान् ग्रन्थकारांश्च स्मरन्नपि नैव क्वचित् दैवं देवं वा साक्षात् सङ्केतमात्रेण वा सस्मार। अतो ज्ञायते देवः क्षीरस्वामिनः पराचीनः। क्षीरस्वामिनश्च कालः वैक्रमद्वादशशतकस्य पूर्वार्धः।

2. दैवस्य व्याख्यात्रा कृष्णलीलाशुकमुनिना स्वकीये पुरुषकारवार्तिके त्रिषु स्थानेषु तादृशो निर्देशः कृतो येन ज्ञायते यद्देवो मैत्रेयरक्षितग्रन्थं धातुप्रदीपमनुसृत्य स्वकीयं ग्रन्थं जग्रन्थ। तथाहि - देवेन तु ष्टै वेष्टने स्तायति तिष्ठापयति इति मैत्रेयरक्षितोक्ततकार-विस्रम्भान्नायमनुसृतः, देवेन मैत्रेयरक्षितविस्रम्भादित्युक्तम्, आप्लृ लम्भन इत्यत्र मैत्रेयरक्षितेन आपयते इत्यात्मनेपदमप्युदाहृतम् उपलभ्यते। दैववशात्तु तस्यापि नैतदस्तीति गम्यते। तदनुसारेण हि प्रायेण देवः प्रवर्तमानो दृश्यते।

एवञ्च देवस्य कालः सामान्यतया वैक्रमाब्दस्य द्वादशशत्या उत्तरार्धः (सं. ११५०-१२००) इति शक्यमूहितुम्।

मैत्रेयरक्षितकृत-धातुप्रदीपानुसारि दैवप्रकरणनिबन्धनात् देवस्यापि

वङ्गदेशीयत्वं सम्भाव्य तथैव निरूपितं व्याकरणशास्त्रैतिह्यप्रतिपादके ग्रन्थे।

> जानातीति श्नि सिद्ध्येज्ज्ञपयति तु पुनर्मारणादौ घटादेः
> चौ मित्त्वेऽपीदमेव ज्ञप मिदिति पदं ज्ञापने मारणादौ।
> तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्याद्
> उक्तस्योक्तिर्णिचश्चेत्युदितविहतये ज्ञापयेज्ज्ञा नियोगे॥

क्र्यादिगणे पठितस्य ज्ञाधातोः[5] श्नाविकरणप्रत्यये जानाति इति रूपम्। घटादिषु मारणतोषणनिशामनेषु ज्ञा[6] इति पठितम्। तस्माण्णिचि मित्त्वे तत्प्रयुक्ते ह्रस्वे ज्ञपयति इति रूपम्। एवं चुरादौ ज्ञप मिच्च इति पठितस्यापि ज्ञपयति इति रूपम्। ज्ञपधातुश्च मारणादिषु ज्ञापने च वर्तते। ततश्च ज्ञापनार्थे[7] ज्ञापयति, ज्ञपयति इति च रूपम्। यद्यपि घटादौ मारणाद्यर्थे ज्ञाधातोः मित्त्वमुक्तं, तस्मिन्नर्थे चुरादौ णिचश्चेति प्राप्तस्य आत्मनेपदत्वस्य बाधनार्थं पुनरुक्तिः।

धातुपाठे ज्ञाधातुः त्रिः पठितः। क्र्यादौ ज्ञा अवबोधने इति धातुः पठ्यते। तस्य श्नाविकरणे ज्ञाजनोर्जा[8] इति जादेशे च जानातीति रूपम्। स एव च धातुः भ्वाद्यन्तर्गणे घटादौ मारणाद्यर्थान्तरेषु मित्त्वार्थं पठितः - मारणतोषणनिशामनेषु ज्ञा इति। मित्त्वफलं तु णौ मितां ह्रस्वः[9] इति ह्रस्वत्वम्। ज्ञपयति इति रूपम्।

चुरादौ ज्ञप मिच्च इति धात्वन्तरं पठ्यते। तस्य मित्त्वात् ज्ञपयति इत्येव रूपम्। अर्थनिर्देशस्तु न तत्र उपलभ्यते। चुरादौ पुनः

---

[5] ज्ञा अवबोधने - धातुप्रदीपः 9.38, क्षीरतरङ्गिणी. 9.38, माधवीयधातुवृत्तिः 9.40 [6] ज्ञा मारणतोषणनिशामनेषु - धातुप्रदीपः 1.528, क्षीरतरङ्गिणी 1.548, माधवीयधातुवृत्तिः 1.535 [7] ज्ञप ज्ञाने ज्ञापने - धातुप्रदीपः 10.76, क्षीरतरङ्गिणी 10.75, माधवीयधातुवृत्तिः 10.76 [8] पा.सू. ७.३.७९ [9] पा.सू. ६.४.९२

ज्ञा नियोगे इति अन्यो धातुः निर्दिष्टः। तस्य च मित्त्वाभावात् ज्ञापयति इति रूपम्। देवः मारणाद्यर्थेषु क्र्यैयादिकः ज्ञाधातुरेव मित्त्वार्थोऽनूदितः, तेन मारणाद्यर्थेषु ज्ञपयति इति रूपं, ज्ञप मिच्च इति चुरादौ मारणाद्यर्थेषु ज्ञापने चार्थे दृश्यते। तेन ज्ञापनेऽर्थे ज्ञाधातोः णिचि ज्ञपयति इति रूपं, क्र्यैयादिकात् ज्ञाधातोः हेतुमण्णिचि (पुकि च) ज्ञापयति इति च रूपम् इत्याह।

अत्र संशयः - घटादिषु मारणतोषणनिशामनेऽर्थे ज्ञाधातोः मित्त्वमुक्तं, तत्पुनः मारणाद्यर्थेष्वेव ज्ञप मिच्च इति कथने फले विशेषो नास्ति इति। तत्र दैवेन इत्थं समाहितम् - णिचश्च इति सूत्रेण कर्तृगामिनि क्रियाफले ण्यन्तादात्मनेपदं विधीयते। मारणाद्यर्थेषु पुनर्मित्वोक्तिः तस्यात्मनेपदत्वस्य बाधनार्था। तेन एष्वर्थेषु ज्ञपयति इति रूपं नास्ति इति।

अत्रेदं विचार्यते - ज्ञप मिच्च इत्यत्र अर्थनिर्देशः नास्ति। तत्र दैवेन मारणादिकं ज्ञापनञ्च अर्थः इति अभ्युपेयते। क्षीरस्वामी तु ज्ञप मारणतोषणनिशामनेषु मिच्च इत्येव पपाठ। घटादित्वादेव सिद्धे स्वार्थणिजर्थं पुनः पाठः इत्यभिप्रेयाय। मैत्रेयरक्षितः ज्ञप मिच्च इत्येव पठित्वा ज्ञापने मारणादिषु च अभिधानमस्यैव इत्याह। अत्र न्यासकारः श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः[10] इति, प्रच्छ ज्ञीप्सायाम् इति च सर्वथा अयं ज्ञाने ज्ञापने प्रयुज्यते। (श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः इत्यत्र ज्ञीप्स्यमानपदस्य ज्ञापयितुमिष्यमाण इत्यर्थात्, प्रच्छ ज्ञीप्सायाम् इत्यत्र ज्ञातुमिच्छा इत्यर्थाच्च) मारणाद्यर्थानाम्

[10] पा.सू. १.४.३४

उपलक्षणत्वं वक्तव्यम्, अर्थान्तरेऽपि प्रयोगसत्त्वात्। एवञ्च ज्ञप मिच्च इत्येवम् अर्थनिर्देश युक्त इति मन्यते।

भट्टोजिदीक्षितैः अयं ज्ञाने ज्ञापने च वर्तते इत्युक्तम्। प्रतिपज्ज्ञप्तिचेतनाः, ज्ञीप्स्यमानः इत्यादिप्रयोगाः अत्र मानम्। घटादौ मारणतोषणनिशामनेषु ज्ञा इति पाठानन्तरं निशामनं चाक्षुषज्ञानम् इति माधवः, ज्ञापनमात्रमित्यन्ये। निशानेष्विति पाठान्तरम्। निशानं तीक्ष्णीकरणम्। एष्वर्थेषु जानातिर्मित् इति व्याख्याय निशामनं चाक्षुषज्ञानम् इति वदतः माधवस्य मते बोधयति इत्यर्थे ज्ञापयति इति कथं मित्त्वम्? तन्मते चाक्षुषज्ञानस्यैव निशामनशब्दार्थत्वात् इत्याशङ्क्य ज्ञापनं मारणादिकञ्च ज्ञप मिच्च इति चुरादौ पठ्यमानस्य अर्थः इति माधवमते समाधानम् उक्तम्। पुनश्च ज्ञाधातोः ज्ञपधातोश्च णौ मित्त्वात् ज्ञपयतीत्येव रूपं, कथं विज्ञापना भर्तृषु सिद्धिमेति इति, तज्ज्ञापयत्याचार्यः इति च आशङ्क्य माधवमते चाक्षुषज्ञानादन्यत्र मित्त्वाभावात् दोषो नास्ति। निशामनं ज्ञापनमात्रम् इति मते तु चौरादिकः ज्ञाधातुः ज्ञापयति इति रूपसाधनाय स्वीकर्तव्यः। नियोगार्थकोऽपि सः, धातूनाम् अनेकार्थत्वात् ज्ञानार्थे वर्तते। निशान इति पाठं स्वीकुर्वतां हरदत्तादीनां मते तु दोष एव नास्ति। ज्ञप मिच्च इत्युपक्रम्य नान्ये मितोऽहेतौ इति कथनात् ज्ञा नियोगे इति धातुः न मित्। इत्थञ्च देवः, माधवः, क्षीरस्वामी च मारणादिषु ज्ञापने च, ज्ञप मिच्च इति, मैत्रेयरक्षितादयः न्यासकारदीक्षितादयः ज्ञाने ज्ञापनादिषु च अमुं धातुं मन्यन्ते।

क्षये क्षयति हिंसायां क्षिणातीति षितो भवेत्। निवासगत्योः क्षियति क्षिणोत्यावगुणे क्षिणोः ॥

क्षयार्थकः क्षिधातुः[11] भ्वादौ पठितः। क्षयति इति रूपम्। हिंसार्थकः क्षिष्-धातुः[12] क्र्यादौ पठितः। क्षिणाति इति रूपम्। षिद्ग्रहणं किमर्थं कृतमिति चेत्, तत्रोच्यते। क्षि इति धातुः अग्रे पठ्यते। तस्य व्यावृत्तिः तावत् सम्पादनीया। षिद्भिदादिभ्योऽङ् इति सूत्रेण अङि कृते क्षिया इति रूपं च सिद्ध्येत्। अतः, अयं धातुः अत्र षित् कृतः।

अयं धातुः ह्रस्वान्तो वा दीर्घान्तो वा इति विषये मतभेदाः सन्ति। मैत्रेयरक्षितः इमं धातुं क्षीष् हिंसायाम् इति दीर्घान्तं पठति, क्षीणाति इति रूपं च प्रदर्शयति। हेमचन्द्रस्यापि क्षीणाति इत्येव मतमिति पुरुषकारे प्रतिपादितम्। सायणाचार्योऽपि दीर्घान्तमेव प्राह। सिद्धान्तकौमुद्यां तु व्री वरणे, भ्री भये, क्षीष् हिंसायाम् इति पठित्वा एषां त्रयाणां ह्रस्वः इति स्पष्टमुक्तम्। तन्नाम, कौमुदीकारमते दीर्घान्त एवायं धातुः। रूपं तु क्षिणाति इति।

अयमर्थः - क्र्यादिगणे पूञ् पवने इत्यारभ्य पठितान् धातून् प्वादयः इति निर्दिश्य प्वादीनां ह्रस्वः इति सूत्रेण शिति (प्रत्यये) ह्रस्वो विहितः - पुनाति इति रूपम्। पूञ् पवने इत्यारभ्य प्ली गतौ इति पाठानन्तरं (पाणिनीयधातुपाठे) वृत्करणं कृतम्। वृत्करणेन च उपात्तस्य गणस्य समाप्तिर्लक्ष्यते। मध्ये लूञ् छेदने इत्यारभ्य ल्वादिगणोऽपि निर्दिष्टः। वृत्करणेन प्वादयः समाप्ताः उत ल्वादयः इति शङ्कायां, केचित् प्वादयः वृत्ताः इति अमन्यत। तन्मते क्षीष्-धातोः क्षीणातीत्येव रूपम्। ल्वादयः एव वृत्ताः, न प्वादयः

[11] क्षि क्षये - धातुप्रदीपः १.१४३, क्षीरतरङ्गिणी. १.१४९, माधवीयधातुवृत्तिः १.१४८ [12] क्षिष् हिंसायाम् - धातुप्रदीपः ९.३७, क्षीरतरङ्गिणी. ९.३७, माधवीयधातुवृत्तिः ९.४९

इति बहवः। तेषां मते तु ह्रस्वे सति क्षिणातीत्येव रूपं भवति। देवेन ह्रस्वान्त एव पाठः कृतः इत्यतः क्षिणाति इत्येव बहुसम्मतं रूपं तन्मते भवति।

क्षिणु हिंसायाम्[13] इति तानादिकस्य धातोः क्षिणोति इति रूपं प्रदर्शितम्। क्षिणुधातुः उविकरणे सति लघूपधगुणे कृते क्षेणोतीति भाव्यम् इति शङ्कायां संज्ञापूर्वको विधिरनित्यः इति परिभाषया गुणाभावः सूचितः देवेन। व्याख्यातञ्च पुरुषकारे। ओर्गुणः इति सूत्रे ओरोत् इति वक्तव्ये गुणग्रहणात् ज्ञापकात् परिभाषेयं सिद्धा। तेन, स्वायम्भुवम् इत्यत्र ओर्गुणः इति गुणो न भवति। तुल्यन्यायेन क्षिणोतीत्यत्रापि गुणाभावः प्रतिपादनीयः इति। मैत्रेयरक्षितेन क्षणु हिंसायां, क्षिणु च इति पठित्वा रूपद्वयमपि प्रादर्शि। क्षीरस्वामी तु क्षणु हिंसायाम् इत्येव पपाठ। क्षिणोति इति रूपञ्च दुर्गमते इत्याह। निवासगत्यर्थयोः प्रतिपादकः क्षिधातुः[14] तुदादौ पठितः। क्षियति इति रूपम्। हिंसार्थकः क्षिणुधातुः तनादौ पठितः। क्षिणोति इति रूपम्।

क्षिणोति विषये मतान्तरम् - क्षिधातोः एव सौवादिकत्वात् श्नुविकरणे क्षिणोतीति रूपं मैत्रेयरक्षितः प्रदर्शयति। ननु स्वादौ विद्यमानस्य क्षिधातोः छन्दसि इति अधिकारान्तर्गतत्वात् कथं भाषायाम् क्षिणोतेः साधुत्वं स्यात्? तथा च छन्दसि इत्यधिकारम् आगणान्तम् इच्छन्ति प्रायः सर्वे। अत्रोच्यते - छन्दसि इत्यस्य छन्दस्यपि इत्यर्थं प्रकल्प्य

---

[13] क्षणु हिंसायां क्षिणु च - धातुप्रदीपः ८.३, क्षीरतरङ्गिणी ८.३, माधवीयधातुवृत्तिः ८.३ [14] क्षि निवासगत्योः - धातुप्रदीपः ६.१११, क्षीरतरङ्गिणी. ६.१०८, माधवीयधातुवृत्तिः ६.१११

भाषायामपि अस्य साधुत्वं वक्तव्यम्। ततश्च पञ्चबाणः क्षिणोति इत्यादिप्रयोगाः सिद्धाः भवन्ति।

दीक्षितास्तु अयं भाषायामपि इत्येके इत्युक्त्वा न तद्यशः शस्त्रभृतां क्षिणोति इति उदाहरणं प्रदर्शयामासुः। अत्र एके इत्यनेन अरुचिः सूचिता। क्षीरस्वामिना तु ऋषि इति पठित्वा ऋङ्ष्णोति इत्युदाहृतम्। तत्र ऋणोति क्षिणोति इत्येके इत्यप्युक्त्वा क्षिणोति इति रूपे अरुचिः प्रकटिता। इत्थञ्च सौवादिकस्य क्षिधातोः भाषायां प्रयोगः न तथा प्रामाणिकः। अत एव कृदन्तरूपमालायामपि छान्दसा इति स्पष्टमेवोक्तम्। प्रयोगास्तु क्षिणुधातुना निष्पादनीयाः इति मे भाति।

8

## शब्दस्वरूपविज्ञानम्

रामकृष्णभट्टः के

तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः। आकाशाद्वायुः"[1] इत्यादिना जगदुत्पत्तिं ब्रुवती श्रुतिः "अन्नात्पुरुषः"[2] इत्याह। पश्वादीनां सर्वेषामपि प्राणिनामन्नरसविकारत्वे समाने कस्मात् पुरुष एवेह गृह्यते - इत्याशङ्क्य 'प्राधान्यात्' इति समाहितम् भाष्यकारैर्ब्रह्मवल्लीभाष्ये। "किं पुनः प्राधान्यम्" इति जिज्ञासायां "कर्मजिज्ञासाधिकारः" इति च तैरेवोक्तम्। पुरुषशब्देनात्र मनुष्यो गृह्यते। स हि विज्ञातं वदति विज्ञातं करोति। तस्मात् पुरुषस्य कर्मज्ञानयोरधिकारः। शक्तत्वात् अर्थित्वाच्च। ज्ञानपूर्वकत्वात् कर्मणः, ज्ञानस्य कर्मणोपि प्राधान्यम्। ज्ञानञ्च वर्णात्मकशब्दादेव जायते वर्धते चेति सर्वसंप्रतिपन्नम्। अत एव शब्दो ज्योतिः, सर्वार्थप्रकाशकत्वात्। सूर्योपि यन्न प्रकाशयति तत् प्रकाशयति शब्दः। तस्मात् शब्दस्वरूपविज्ञानार्थोयमारम्भः।

शब्दादर्थं पतिपद्यामहे इति सर्वेषामनुभवः। तस्मादस्ति शब्दे काचिदर्थबोधकताशक्तिरिति निश्चिनुमः। शक्तेराश्रयः कः, यस्य च श्रवणादर्थबोधः इति विचारस्तु प्रकृतः, शब्दस्वरूपनिर्धारणे प्रवृत्तत्वात्। शब्दो नाम वर्णात्मको वर्णसमुदाय इत्याह। नेयमुक्तिः समञ्जसा वर्णसमुदायस्य युगपत् अनुपलब्धेः। स हि घटपटादिवत्

[1] आनन्दवल्ली -१ [2] आनन्दवल्ली -१

शब्दः क्वचिदुपलभ्यते। क्रमेण वर्णानुच्चार्य भवत्सम्मत शब्दस्य निष्पाद्यमानत्वात्। वर्णानामाशुविनाशित्वेन द्वितीयवर्णोच्चारणवेलायां प्रथमस्याभावात् अन्त्यवर्णोच्चारणसमये पूर्वेषामभावात् वर्णसमुदायस्य अनुपलम्भ एव। न च अन्त्यवर्णोच्चारणात्परं सर्वेषां युगपत् स्मरणं सम्भवतीति वाच्यम्। येन क्रमेण उच्चारणं तेन क्रमेणैव स्मरणं भवतीति नियमाभावात्। नदी-दीन, यवः-वयः, तपन-पतनादिषु व्यत्ययेन स्मरणे अर्थभेदप्रसङ्गात्। किञ्च श्रूयमाण-ध्वनीनामुच्चैस्त्व-नीचैस्त्व-मृदुत्व-कठोरत्वादिभिरसंख्यानभेदवत्वेन शाब्दबोधे अव्यवस्थाप्रसङ्गः। तथाहि मृदुध्वन्युच्चारितो घटशब्दः कलशं बोधयतीति यस्य शक्तिग्रहः, तस्य कर्कशध्वन्युच्चा-रितघटशब्देन बोधो न स्यात्। किञ्च वर्णानामाशुविनाशित्वेन वर्णसमुदायाभावात् अर्थबोधकताशक्तेराश्रयस्यैव अनुपपत्तिः। उच्चारणभेदात् शब्दभेदाच्च 'स एवायं शब्दः' इति प्रत्यभिज्ञाया अप्यनुपपत्तिः। लिख्यमानस्तु लिपिरूपरेखाविशेषः शब्दं स्मारयति, नत्वसौ शब्दः। दृश्यत्वाच्च। न हि शब्दो दृश्यते।

किञ्च वर्णानां क्रमेणोच्चारणेपि यौगपद्येन सर्वेषां श्रवणादर्थबोध इति यदुक्तं तदयुक्तम्। यौगपद्येन श्रवणाभावात् तज्जन्यसंस्काराभावेन यौगपद्यस्मरणासम्भवात्। एकैकवर्णश्रवणजन्यसंस्कारस्य पृथक्त्वेन, पृथगेव वर्णानां स्मरणं, न तु यौगपद्येन। ननु काण्डशाखापर्णादीनां समुदायो वृक्षः। तथापि वृक्षस्य युगपत् स्मरणं सम्भवति। तथा वर्णसमुदायो युगपत् स्मर्यत इति चेत् वैषम्यात्। अवयवसमुदायोपि वृक्षः युगपत् दृश्यत इति वृक्षदर्शनजन्यसंस्कारात् वृक्षस्य स्मरणं युज्यते। वर्णसमुदायस्तु युगपन्न श्रूयत इति वैषम्यम्।

एवं तर्हि कः शब्दः? कश्च अर्थबोधकतारूपशक्त्याश्रयः? उच्यते। उच्चारितैर्ध्वनिभिः वर्णपदाभिधेयैरभिव्यज्यते कश्चिदखण्डः शब्दः। स चोच्चारितध्वनिरूषितो बोधयत्यर्थम्। स एवार्थबोधकताशक्त्याश्रयः। सोप्यखण्डः शब्दः स्फोट इत्यभिधीयते वैयाकरणैः। स्फुटत्यर्थः अस्मादिति स्फोटः इति व्युत्पत्तिः।

ननु ये वर्णाः स्फोटं व्यञ्जयति त एव वर्णाः अर्थं बोधयन्ति इति किमर्थोयं स्फोटः? तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इति न्यायात्। नैतदेवम्। अभिव्यञ्जनाभिधानयोर्भेदात्। श्रूयमाणा वर्णा आशुविनाशिन इत्युक्तम्। उच्चारितैर्वर्णैः रत्नपरीक्षन्यायेन क्रमेण अभिव्यञ्जनं भवति स्फोटस्य। ततो युगपदर्थबोधः। स्फोटानाम् आश्रयणे तु युगपदर्थो न बुध्येत। क्रमेणार्थबोधो न कस्यापीति विशेषः। किञ्च 'अयमेकः शब्दः। शब्दादर्थं प्रतिपद्यामहे' इत्यनुभवः सर्वेषां न तु "वर्णैरर्थं प्रतिपद्यामहे" इति। यत्तु तार्किकाः स्फोटमनङ्गीकुर्वन्तो ध्वनिभिरेवार्थबोध इति मन्वते, तत्तु अर्धजरतीयन्यायमनुसरति। उत्पत्तिवादिनस्ते हि तन्तुभिर्वस्त्रमन्यदुत्पद्यते तन्तुभ्योतिरिक्तमिति वदन्ति। किमर्थं वस्त्रमन्यदुत्पद्येत? तन्तुसमूह एव वस्त्रम्। इमे तार्किका तन्तुसमूहं धारयामो न तु वस्त्रमिति ब्रुवन्तु।

मीमांसकाः पुनः नित्यं वर्णं सङ्गिरन्तः "ध्वनिना नित्यो वर्णः अभिव्यज्यते। पिपीलिकापङ्क्तिरिव उच्चार्यमाणाः वर्णा एव वाचका इति ब्रुवते। नित्यत्वेपि वर्णानां पिपीलिका पङ्क्तिरिव वर्णसमूहो युगपत् ज्ञानगोचरो न भवतीति पूर्वोक्तो दोषः समानः। वर्णस्य नित्यत्वे व्यङ्ग्यत्वे च वर्णस्फोट एव सः। वर्णस्फोटः

स्वीक्रियते न तु पदस्पोटः इति तु च्छलमात्रम्। न तु विद्वन्मनोहरम्। यत्तु श्रीशङ्कराचार्यैः सूत्रभाष्ये "वर्णा एव वाचका इति भगवानुपवर्षः" इत्युक्तम्। तत्तु उपवर्षाचार्यमतस्य अनुवादः, न तु स्फोटवादस्य खण्डनम्। शास्त्रकारा हि ग्रन्थेषु मतान्तराप्यनुवदन्ति प्रपञ्चार्थम्। न तावता तेषु मतेषु नैर्भर्यं तेषाम्। ब्रह्माद्वैतवादिनां श्रीशङ्कराचार्याणां स्फोटवादस्य मण्डने खण्डने वा न लाभो न च हानिः। उपवर्षाचार्याः मीमांसकाः। किं मीमांसकसिद्धान्तः संमतो भगवत्पादानाम्? अथवा पुनरस्तु स्फोटवादोस्माकं प्रस्थानान्तरम्। अन्यप्रस्थानेन न दोषायेति न किञ्चिदेतत्।

ननु स्फोटादेवार्थबोधो न तु वर्णेभ्यः इति अङ्गीकारे शब्दानां बहुत्वात् असंख्याता भवन्ति स्फोटाः इति चेत्। इष्टापत्तिः। एवं हि देशीय विदेशीयभाषास्वपि स्फोटादेव अर्थप्रतिपत्तिरिति वक्तव्यं भवति, युक्तिसाम्यादिति चेत्। इष्टापत्तिरित्येवोत्तरम्। सर्वभाषास्वपि वर्णघटितत्वात् शब्दानां तत्तद् वर्णाभिव्यङ्ग्यादखण्डात् स्फोटादेव अर्थं प्रतिपद्यन्तो जना इत्यविशेषः। ननु शब्दब्रह्मवादी भवान्। शब्दाद्वयवादी च। स्फोटश्च शब्दः। तथाच अनन्तानि ब्रह्माणि। अद्वयवादस्य मूले कुठरश्चेत्यहो हास्यास्पदं ते दर्शनम्। शब्दाद्वयवादिनामयं सिद्धान्तो दरीदृश्यते, जाज्वल्यते च सर्वदर्शनानां मध्ये वेदप्रामाण्यात्, पतञ्जल्यादिमुनिसम्मतत्त्वाच्च।

ओमिति ब्रह्म। ओमितीदं सर्वम्।[3] इति श्रुतेः ओम् इत्येतत् शब्दब्रह्म। तदेव महास्फोटः। स एवानिर्वाच्यतया मायया घटपटवृक्षाद्यर्थरूपेण विवर्तते। ये च श्रवणप्रत्यक्षविषया वर्णाः ते

[3] शिक्षावल्ली - ८

सर्वे शब्दब्रह्मणो विवर्ताः। तैरुपाधिभिरेक एव महास्फोटः विभिन्न इव प्रतीयमानः घटपटाद्यर्थजातं प्रकाशयति। न च साङ्कर्यम्। उपाधिभेदादर्थभेदोपपत्तेः। "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतिवचने जाग्रत्यपि यथा मायकल्पितासंख्यैर्द्रव्यैः नानाविधो लोकव्यवहारः ब्रह्माद्वैतवादिनां, तथैव कल्पितवर्णोपाधिभिर्विभिन्नत्वेन प्रतीयमानैः शब्दैः स्फोटाख्यैर्लोकव्यवहारोनुगम्यते।

अकारादयो वर्णाः द्रव्याणि न तु गुणाः। ते च स्थानप्रयत्न-भेदादुच्चारणक्रियया निष्पाद्यन्ते। यत्तु "आकाशः शब्दगुणः" इत्येवं शास्त्रे व्यवहारः। तत्र शब्दशब्देन ध्वनिसामान्यं गृह्यते, न तु वर्णः। लोके तु ध्वनिवर्णयोरभेदेन व्यवहार इति ध्वनिशब्देन वर्णे गृहीतेपि न दोषः। लोकप्रतिपत्त्यर्थमेव शास्त्रप्रवृत्तेः। एकस्य महास्फोटस्य स्वीकारादेव 'सर्वे सर्वार्थवाचकाः' इत्युक्तेरुपपत्तिः। एकस्यैव तस्य उपाधिभिः सर्वशब्दरूपत्वेन सर्वार्थवाचकत्वस्योपपादनात्। "सर्वे सर्वार्थवाचका इति तु योगिदृष्ट्या" इति व्याख्यातारः। योगिनामपि कथमेतदुपपद्यते? न हि योगिनो भ्रान्ताः। तस्मादत्र योगिनो नैव पातञ्जलाः। किन्तु शब्दब्रह्मविदो वैयाकरणा इति बोध्यम्।

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योध्यमृतात् सम्बभूव। समेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्" इति शिक्षा।[4] अत्र श्रीशाङ्करभाष्यम् - यः सोङ्कारः छन्दसां वेदानां वृषभ इव वृषभः, प्राधान्यात्। विश्वरूपः सर्वरूपः सर्ववाग्व्याप्तेः। "तद्यथा शङ्कुना" इति श्रुत्यन्तरात्। अत एव वृषभत्वम् ओङ्कारस्य। छन्दोभ्यः वेदेभ्यः, वेदा ह्यमृतम्। तस्मात् अमृतात् अधि

[4] शिक्षावल्ली - ४.१

सम्बभूव। लोकदेववेदव्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेः तपस्यतः ओङ्कारः सारिष्ठत्वेन प्रत्यभादित्यर्थः। न हि नित्यस्य ओङ्कारस्य अञ्जसैवोत्पत्तिरवकल्पते। सः एवं भूत ओङ्कारः इन्द्रः सर्वकामेशः परमेश्वरः मा मां मेधया स्पृणोतु प्रीणयतु बलयतु वा। प्रज्ञाबलं हि प्रार्थ्यते। अमृतस्य अमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य तदधिकारात्; हे देव धारणः धारयिता भूयासम् भवेयम् इति। तत् सर्वमस्मदनुकूलम्। यदेतस्य उपास्यत्वेन योजनं भाष्ये, तदपि न विरुध्यते शब्दब्रह्मोपासकानाम् अस्माकम्।

उपर्युक्तभाष्ये 'सर्ववाग्व्याप्तेः' इत्यस्य विवरणं वनमालायाम् - शब्दमात्रे कृत्स्नस्याभिधीयस्यान्तर्भावं "तस्य वाक्तन्ति" इत्यादि श्रुत्युक्तं सिद्धं कृत्वा तस्य सर्वशब्दात्मकत्वे प्रमाणमाह - तद्यथेति। तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वावाक् संतृण्णा इति श्रुत्यन्तरम्।

एवञ्च सर्वमभिधानमभिधेयञ्च ओङ्कारेण शब्दब्रह्मणा व्याप्तमिति स्पष्टम्। अभिधानं शब्दः। अभिधेयमर्थः। शब्दार्थरूपं सर्वं नान्यत् किञ्चिदस्ति। सर्वमिदं जगत् शब्दब्रह्मणो विवर्तः। साधुखल्वेतदुक्तं तत्रभवता भर्तृहरिणा -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेर्थभावेन प्रक्रिया जगतो यतः ॥[5]

शिक्षायाम् पञ्चमानुवाके "भूर्भुवःसुवरिति वा एतस्तिस्रो व्याहृतयः" इत्युक्त्वा माहाचमस्येन दृष्टा मह इति चतुर्थो व्याहृतिः उदाहृता।

[5] वाक्यपदीयम् - ब्रह्मकाण्डम् -१

ततश्च "तद्ब्रह्म। स आत्मा" इत्युक्तम्। इदमन्यासां तिसृणामपि व्याहृतीनामुपलक्षणम्। एवं चतसृणामपि व्याहृतीनां ब्रह्माभिन्नत्व-प्रतिपादनं शब्द एव ब्रह्म इत्यर्थं द्रढयितुमेवेति द्रष्टव्यम्।

षष्ठानुवाके च मह इति ब्रह्मणि इति वाक्ये मह इति पर-ब्रह्मैवोपास्यमिति वनमालायां निर्णीतम्। सादृश्यात् सामीप्याच्च शब्दब्रह्मणः मह इति शब्दरूपव्याहृतेरेवोपास्यत्वमुक्तं श्रुत्या, नतु सालग्रामादेः शिलारूपस्य इत्यपि द्रष्टव्यम्। पुनरप्य-ष्टमेनुवाके "ओमिति ब्रह्म। ओमितीदं सर्वम्" इत्यभिहितम्। अत्र श्रीशङ्कराचार्याः - ओम् इत्येतच्छब्दरूपं ब्रह्म इति मनसा धारयेत्। यतः ओमितीदं सर्वम्। सर्वं हि शब्दस्वरूपं ओङ्कारेण व्याप्तम्। "तद्यथा शङ्कुना" इति श्रुत्यन्तरात्। अभिधानतन्त्रं हि अभिधानम् इत्यतः इदं सर्वमोङ्कार इत्युच्यते" इति। अत्र वनमाला - अभिधेयजातस्य अभिधानाधीनसिद्धिकत्वात् वाच्यवाचकयोः तादात्म्यस्वीकाराच्च अभिधेयजातस्याभिधानेन्तर्भावः। इति।

अत्र ब्रूमः। विवर्तानां विकाराणां च प्रकृतावन्तर्भावः। घटशरावादीनां विकाराणां च प्रकृतौ मृत्तिकायामन्तर्भावः। रज्जुसर्पस्य रज्जावन्तर्भावः। प्रकृतिर्व्यापिका। विकृतिस्तु व्याप्या। अभिधानव्याप्यमभिधेयम्। शब्दस्य विवर्तः अर्थः। अर्थस्य शब्देन्तर्भावः। अत्र व्यापकत्वं बहुदेशवृत्तित्वम्। व्याप्यत्वम् अल्पदेशवृत्तित्वम्। यत्र यत्र अर्थः तत्र तत्र शब्दः इति शब्दो व्यापकः। यत्र यत्र शब्दः तत्र तत्र अर्थः इति नास्ति व्याप्तिः। हुं फट् ह्रां ह्रीं ह्रूम् इत्यादौ अनर्थकनिपातेषु च अर्थस्याभावात्। अत एव अभिधानव्याप्यत्वमभिधेयस्य। एवञ्च अभिधानकृतविकारा इमे पदार्था

इति सिद्धम्। पदार्थ इति रूढः शब्दोपि व्यञ्जयति पदस्य विकारा इति। पदस्य अर्थाः पदार्थाः। "अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इति हरिः घटः सन् इत्यादौ सदर्थो ब्रह्म अव्यभिचारेण भासते ब्रह्माद्वैतवादिनां तथास्माकं शब्दब्रह्मवादिनां शब्दोपि भासते पदार्थज्ञाने। अत एव केषाञ्चित् शब्दानां प्रयोगे काव्येषु अश्लीलत्व-रूपशब्ददोषो न त्वर्थदोषाः काव्यमीमांसकानाम्।

अष्टमानुवाके च श्रुतिराह – ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैकोपाप्नोति इति। अत्र श्रीशङ्करभाष्यम् – ब्रह्म परमात्मानम् उपाप्नवानीति आत्मानं प्रवक्ष्यन् प्रापयिष्यन् ओमित्येवाह। स च तेनोङ्कारेण ब्रह्मप्राप्नोत्येव इति। अनेन भाष्येण ओङ्काररूपं ब्रह्म ब्राह्मणः प्राप्नोति इति लभ्यते। प्राप्तिश्च ओङ्काररूप ब्रह्मणा सायुज्यमेवेत्यवधेयम्।

ननु ओङ्कार इत्यत्र वर्णात्कार इति कारप्रत्ययः। ओमिति वर्ण इत्यभ्युपेयम्। स च श्रोत्रेन्द्रियग्राह्यः प्रत्यक्षः। ब्रह्मणः प्रत्यक्षत्वं न केनाप्यन्यैरभ्युपगतम्। भवदभ्युगतं ब्रह्म किं प्रत्यक्षम्? मैवम्। ओङ्कारेणाभिव्यज्यमानो महानादो ब्रह्म। स एव महास्फोटः परमेश्वरः। स च न श्रवणगोचरः। वाच्यस्यापि प्रत्यक्षत्वनियमो नास्ति। किं पुनर्व्यङ्ग्यस्य। ननु मृदङ्गताडनादिभिरुत्पद्यमानो नादः श्रूयते? न। विशेषात्। को विशेष इति चेत्। ओङ्कारेण अभिव्यङ्ग्यत्वमेव विशेषः। उत्पद्यमाना ध्वनयः श्रवणगोचरा इत्यस्माभिरप्यङ्गीकृतमेव। महानादविशेषोयं न श्रवणगोचर इति न काचिदनुपपत्तिः। ओमित्येकाक्षरं ब्रह्म इति श्रुतिः। एकमक्षरम् इति कर्मधारयसमासः। पूर्वकालैकसर्व..." इत्यादिसूत्रेण समासः।

एकम् = अद्वितीयम्। न क्षरतीत्यक्षरम्। शाश्वतमित्यर्थः। शाश्वतमद्वितीयमोमिति शब्दगम्यं महानादस्वरूपं ब्रह्मेति वाक्यार्थः। नतु एकमक्षरं यस्मिन्स ओं शब्द इति बहुव्रीहिः। ओङ्कारे शब्दे अ उ म् इत्यक्षरत्रयसत्वात्। तदुक्तम्- अकारश्च तथोकारो मकारश्चाक्षरत्रयम्। एतास्तिस्रः स्मृता मात्राः सत्त्वराजसतामसाः॥ इत्याद्यागमग्रन्थविरोधात्। ब्रह्मणः शब्दरूपत्वादेव अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" इति स्मृतिः। वाचा विरूपनित्यया, वागेव विश्वा भुवनानि जज्ञे इत्यादिश्रुतयश्च शब्दब्रह्मणो माहात्म्यमाचक्षते। सर्वेषां वेदानामोङ्काररूपत्वेन "सर्वे वेदा यत्पदमामनन्ति.." इत्याद्युपपद्यते। नच भवद्रीत्या महानादस्य शब्दब्रह्मणो जडत्व- माशङ्कनीयम्। तस्य चैतन्यरूपत्वात्। वेदाभिन्नत्वेन ओङ्कारेणभिन्नं हि शब्दब्रह्म। तच्च आत्मविज्ञानं चैतन्यम्। श्रीशङ्करा- चार्यैरपि ब्रह्मवल्ल्यास्तृतीयानुवाकभाष्ये "मनोवृत्त्युपाधि- परिच्छिन्नं आत्मविज्ञानं मन्त्राः" इति स्पष्टमेवोक्तम्। आत्मविज्ञानञ्च चैतन्यमेव।

किञ्च श्रीगणेशाथर्वशीर्षे गणेशदेवतायाः स्वरूपम् शब्दतत्त्वमेवेति स्फुटमभिहितम्। तथाहि - श्रीगणेशदेवतामुद्दिश्यैवमुच्यते - "त्वमेव प्रत्यक्षं ब्रह्मासि" एवकारो भिन्नक्रमः। त्वं प्रत्यक्षं ब्रह्मैवासि इति। शब्दब्रह्म ओङ्कारो हि श्रवणप्रत्यक्षः। ननु महानादस्य शब्दब्रह्मणः ओङ्कारेण अभिव्यङ्ग्यत्वमुक्तं भवतैव। नतु ओङ्कारस्यैव शब्दस्य ब्रह्मत्वमिति चेत्। सत्यम्। ओमिति ब्रह्म, ओमित्येकाक्षरं ब्रह्म इत्यादिभिः श्रुतिभिः, स्मृतिभिः तस्य वाचकः प्रणवः इति योगसूत्रेण च शब्दब्रहमणः गणेशस्य प्रधानं प्रतीकमोङ्कार

इत्यवधारणात् शब्दार्थयोरभिन्नत्वाच्च "त्वमेव प्रत्यक्षं ब्रह्मासि" इत्युक्तम्। नहि सलगामादेः प्रतीकस्य ईश्वराभिन्नत्वं क्वचिदपि श्रुतं स्मृतं वा। तस्मात् सुष्ठूक्तं त्वं ब्रह्मासीति। त्वं चत्वारि वाक्-परिमिता पदानि' इति कण्ठरवेणोक्तः शब्दाभेदः श्रीगणेशस्य। किञ्च त्वं मूलाधारस्थितोसि नित्यमिति वचनमप्यस्मदनुकूलम्। परा वाङ्मलचक्रस्था इत्यादिवचनात्। वाङ्मयस्त्वं चिन्मयः त्वं वाग्रूपस्त्वं चिद्रूपेत्यर्थः। स्वार्थे मयट्। तत्प्रकृतवचने मयट् इति सूत्रात्।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति - इत्यस्यायमर्थः। शब्दब्रह्मसमस्तवाचां प्रधानभूते ओङ्कारे निष्णातः परिनिष्ठितचित्त-संस्कारस्तत्स्वरूपं जानन् पुरुषः परंब्रह्म ओङ्काराभिव्यङ्ग्यं महानादं महास्फोटाख्यं ब्रह्म अधिगच्छति इति। अत एव "एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग् भवतीति महाभाष्यकारः। सम्यग् ज्ञातः ओमितीदं सर्वम् अहं शब्दब्रहम इति शब्दतत्त्वविज्ञानेन ज्ञातः। सुप्रयुक्तत्वञ्च व्याकरणशास्त्रेण शिक्षया च परिष्कृतबुद्ध्या प्रयुक्तत्त्वम्। एतेन सिद्धमेतत् - यत् ब्रह्माद्वैतवादिनोपरब्रह्मेत्याचक्षते शब्दब्रह्म, तदेव अस्माकं परब्रह्म। न चोङ्कारः शब्द एव परब्रह्मेति भ्रमितव्यम्। किन्तु तदभिव्यङ्ग्यो महास्फोट एव तदिति वेदितव्यम्। महानादः, अनाहतनादः - इत्यपि तस्य शास्त्रेषु व्यवहारः। तस्य वाचकः प्रणवः इति योगसूत्रे वाचक इत्यस्य व्यञ्जनया बोधक इत्यर्थः। "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह" इति श्रुतेः। दुन्दुभ्यादावाहन्यमाने श्रूयमाणो ध्वनिराहतनादः। अयमनाहतनादः स्वतःसिद्धः स्वयंप्रकाशः योगिभिरेव गम्यमानः।

घटपटादिपदेषूच्चारितेषु तदभिव्यङ्ग्यः तद्वर्णरूषितः स्फोटः एवार्थबोधं जनयति सूक्ष्मवेदिनां न तु अज्ञानिनाम्। यथा ब्रह्माद्वैतवादिनां मते घटपटादयोर्थाः ब्रह्मैव सन्तः जलाहरणादिक्रियाभेदं जनयन्ति उपाधिभेदात्। अयञ्च विवर्तवादः अन्या सर्वापिप्रक्रिया मायासहकारेण ब्रह्माद्वैतवादिनामिव नेया। भगवता भर्तृहरिणा सुष्टूक्तम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेर्थभावेन प्रक्रिया जगतो यतः ॥ इति ॥

## परिशीलितग्रन्थसूची


1. अष्टाध्यायी, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९९२
2. वैयाकरणसिद्धान्तकौमुदी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, १९९१
3. व्याकरणमहाभाष्यम्, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९९१
4. वाक्यपदीयम्, विश्वविद्यालयमातृकाग्रन्थालयः, तिरुवनन्तपुरम्, १९४२
5. काशिका, तारा बुक् एजेन्सी, वाराणसी, १९९४
6. शब्दकौस्तुभः, चौखम्बासुरभारतीप्रकाशन, वाराणसी, १९९७
7. उपनिषद्भाष्यम्, गीताप्रेस्, गोरख् पुर, १९९३
8. तैत्तिरीयोपनिषत्, श्रीरामकृष्णमठः, बेङ्गलूरु, २००६
9. श्रीगणपत्यथर्वशीर्षोपनिषत्, श्रीरामकृष्णमठः, बेङ्गलूरु, २००२
10. वैयाकरणभूषणसारः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१२

# 9

## कठमुण्डकोपनिषदुक्तयोगविचारः

श्रुतिः एच्. के.

सर्वासामुपनिषदां जीवब्रह्मणोरैक्यप्रतिपादनमेव परमं चरमं च लक्ष्यम्। कृतकस्य बाह्यप्रपञ्चस्य ऐक्यं प्रदर्शयन्त्यः स्वाभाविकस्य शारीरकस्यैक्यं प्रतिपादयन्ति। यथार्थतः नित्यनिरतिशयस्य प्रत्यग्ब्रह्मणोरैक्यस्य शुद्धबुद्धमुक्तस्वभावस्य परिदृश्यमानभेदास्तु अविद्याकामकर्माव्यक्तबीजजनिताः भवन्ति। अतः, नैकविधभेदाः परस्परविरोधिनः चित्तवृत्तिमूलाः इति उपनिषदः एव प्रकशयन्ति। 'यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा'[1] 'यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः'[2] इति श्रुत्युक्तेः। चित्तवृत्तीनां प्रतिबन्धनाय यद्यपि अनेके मार्गाः पूर्वसूरिभिः प्रदर्शिताः यज्ञानुष्ठानोपासनादयः तत्र योगमार्गः प्रधानं स्थानं वहति।

'योगश्चित्तवृत्तिनिरोधः'[3] इति स्वलक्षणं ख्यापयत् वेदान्तकथितमविद्याकामकर्ममूलं चित्तवृत्तिनिरोधम् अनेन शास्त्रोक्तरीत्या योगाभ्यासेन साधयति मुमुक्षुः इति दृढयति। 'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्'[4] इति कठश्रुत्युक्तरीत्या इन्द्रियाणां बाह्यानामन्तरिन्द्रिये लयः, मनस्समाधाने सति बुद्धिचेष्टा अपि शान्ता भवन्ति। एवं

[1] कठ-१/३/५ [2] कठ-१/३/७ [3] समाधिपादे-२ [4] कठ-२/६/१०

बुद्धिमनसोः शान्तत्वं समत्वमेव परमागतिरित्युच्यते। तादृशसमत्वं योगेन साध्यते -'समत्वं योग उच्यते'[5] इति गीताचार्यः। तत्कथं योगाभ्यासेन मनस्समाधातव्यमिति कठमुण्डकश्रुतयः विवृण्वन्ति।

कठोपनिषदि योगविचारः एवं प्रस्तुतः-

प्रथमाध्यायस्य तृतीयवल्यां जीवस्य संसारगतिः मोक्षगतिश्चोच्यते। सुलभप्रतिपत्यर्थमादौ प्राप्तृप्राप्तव्यगन्तृगन्तव्ययोर्विवेचनार्थं रथरूपकं कल्प्यते। हृदयगुहायां संसारित्वेनासंसारित्वेन विलक्षणौ प्रविष्टौ। तत्र संसारी श्रेयसि प्रेयसि च अधिकृतः तदधिगमाय प्रवर्तते। यः युक्तायुक्तविवेकी सैव परमं पदं स्वात्मानं वेत्ति, अपरः मुहुमुहुरपि संसारचक्रे एव भ्रमति। साधकस्य प्रत्यगात्माधिगमाय सूक्ष्मतारतम्यभेदः उच्यते। तदेवं - इन्द्रियेभ्यः विषयाः सूक्ष्माः, ततः मनः, बुद्धिः, हिरण्यगर्भः, अविद्या, क्रमेण सूक्ष्मतराः, आत्मा सूक्ष्मतमः 'सा काष्ठा सा परा गतिः'[6] इति। आत्मनः सर्वसूक्ष्मत्वात् इन्द्रियादिभ्यः विषयीकर्तुं न शक्यते। 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'[7] इति श्रुत्युक्तरीत्या आत्मा हृदयगुहायामवस्थितः एकाग्रतयोपेतया बुद्ध्या सूक्ष्मदर्शिभिः योगिभिः उपलभ्यते। योगशास्त्रेऽपि 'तत्प्रतिषेधार्थमेकतत्त्वाभासः'[8] इति सूत्रे विक्षेपप्रतिषेधार्थमेकतत्त्वालम्बनं चित्तमभ्यस्येत्। यस्य तु प्रत्यर्थनियतं प्रत्ययमात्रं क्षणिकं च चित्तं तस्य सर्वमेव चित्तमेकाग्रम्, नास्त्येव विक्षिप्तम्। यदि पुनरिदं सर्वतः प्रत्याहृत्य एकस्मिन्नर्थे

[5] भववद्गीता-२/४८ [6] कठ-१-३-११ [7] कठ-१-३-१२ [8] यो.सू-२-३२

समाधीयते तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतम्[9] इत्युच्यते। अतः स्वदर्शनाय एकाग्रबुद्धिः अपेक्षिता। संस्कृतबुद्धिरपि भवेत्। संस्कृतया नाम निदिध्यासनप्रचयजन्यसंस्काररहितया[10] बुद्ध्या ध्यातव्यम्। इत्युक्तौ निदिध्यासनप्रचयजन्यसंस्काररहितया बुद्ध्या असंस्कृततया न प्रकाशते आत्मेत्यर्थः। एवमेव ब्रह्मात्मैक्यमेव अग्रं मुख्यं लक्ष्यं यस्याः तस्या भावः एकाग्रता इत्युच्यते अत्र। तादृश एकाग्रतया सुसंस्कृतबुद्धिना आत्मा विज्ञेयः। अग्रे उच्यते 'क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति'[11] इति मुमुक्षोः मार्गः तीक्ष्णीकृता अतिकष्टेन प्राप्तव्या च वर्तते। यथा दुर्गमं पर्वतं अरण्यं च घोरं भवति तद्वत् दुःसम्पाद्यं दुर्गमं च भवति आत्मज्ञानमार्गः।

ब्रह्मज्ञानसाधनत्वेन श्रुतिमिमां व्याचष्टे - 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि॥'[12] इति। साधकस्य आत्मज्ञानस्य प्राप्त्युपायभूतं ज्ञानं तदुपायं च अत्रोक्तम्। आदौ सर्वाणि इन्द्रियाणि स्वविषयेभ्यः उपसंहृत्य मनसि सङ्कल्पविकल्पात्मके नियच्छेत्। मनः इन्द्रियाणां विषयाणां प्रग्रहस्थानीयमित्यतः। अस्यापि मनसः बुद्धितन्त्रत्वात् सारथिस्थानीये बुद्धौ मनसः लयं कारयेत्। बुद्धिमपि हिरण्यगर्भे (व्यष्टिबुद्धेः समष्टिबुद्धौ प्रविलापः उच्यतेऽत्र।) प्रथमजे स्वच्छस्वाभाविके नियच्छेत्। प्रथमजः आत्मनः स्वच्छस्वभावकं विज्ञानमापादयति अतः। तमपि महान्तं शान्ते अविक्रिये सर्वान्तरे सर्वविकल्पनिरस्तरूपे मुख्ये नियच्छेत्।

[9] यो.सू.भा-१-३२ [10] गोपालयतीन्द्रटीका-१-३-१२ [11] कठ-१-३-१४ [12] कठ -१-३-१३

एवमुत्तरोत्तरम् अविक्रिये शुद्धे नियोजनेन स्वरूपमेव तिष्ठति। एवं प्रत्यगात्मस्वरूपसाक्षात्कारेण समस्तमपि विकल्पं प्रविलाप्य साधकः कृतकृत्यः भवति।

'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्॥'[13] इति। अत्र गोपालयतीन्द्रटीकायामित्थमुच्यते -'श्रुतिवेदान्तानामपि केषाञ्चिद्ब्रह्मास्मीति बुद्धिस्थैर्यादर्शनात् अस्ति प्रतिबन्धान्तरं तदपनयनाय अन्योऽप्युपायः' इति इयं श्रुतिरारब्धेति। आचार्यभगवत्पादा अपि इत्थं वदन्ति-'सा हृन्मनीट्कथं प्राप्यत इति तदर्थो योग उच्यते' इति। योगस्य वेदान्ते उपयोगः चित्तशुद्धिरेव। तत्कथमिति अत्र उच्यते। यदा सर्वेन्द्रियाणि स्वस्वविषयेभ्यः निवृत्तानि सन्ति, स्वकारणीभूते मनसि लयं प्राप्नुवन्ति, ततः मनसः अपि बुद्धौ अध्यवसायलक्षणे लयः भवति तदा बुद्धिः शान्तः भवति। अशान्तिकारणभूतानां लयत्वात् बुद्धिः न विचेष्टति। एतां स्थिरामिन्द्रियधारणां चित्तशुद्धिलक्षणामेव योगः इत्याहुः योगिनः मनीषिणः, 'योगः चित्तवृत्तिनिरोधः' इति। तदा साधकः अप्रमत्तः भवति। अस्यामवस्थायां यद्यपि वियोगः भवति तथापि योगः इत्युच्यते। बुद्ध्यादीनां चेष्टाद्युपरमात् अप्रमत्तः भवति योगी। अतः योगी समाधेः प्राक् समाधिकाले चेष्टादिरहितः इत्यतः प्रमत्तो वा अप्रमत्तो वा न भवति, तस्यामवस्थायां जागरूकः भवेत्। योगस्य फलं तु समाधिः तदा योगी अप्रमत्तः एव भवति। अत्राचार्याः जागरूकः किमर्थं भवेत् योगीति इत्थं वदन्ति -'योगो हि यस्मात् प्रभवाप्ययौ उपजनापायधर्मक इत्यर्थः। अतोऽपायपरिहाराय

[13] कठ-२-३-१०

अप्रमादः कर्तव्य इत्यभिप्रायः' इति। अतः योगारम्भकाले अत्र प्रमादवर्जनं विधत्ते श्रुतिः। प्रमादवर्जनमन्तरा योगस्य तस्य फलस्य समाधेः प्राप्तिर्नभवति इत्यतः जागरूकः भवेत्। अयं विचारः भगवद्गीतायामपि प्रस्तुतः 'तं विद्याद्दुःखसंयोगवियोगं योगसञ्ज्ञितम्। स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा' ॥[14] इति। योगिनः समाधेः फलमपि तत्रोक्तम् - 'युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्षमत्यन्तं सुखमश्नुते' ॥[15] इति। श्वेताश्वतरे अपि 'पृथ्व्याप्यतेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्' ॥[16] इति योगिनः महत्वं ख्यापयति।

मुण्डकोपनिषदि योगविचारः एवं प्रस्तुतः-

यत्सत्यं यच्चामृतं तदक्षरं ब्रह्म तद्वेद्धव्यमिति श्रूयते[17] ।मनस्समाधानं तु अक्षरे एव कर्तव्यमिति अर्थः। तत्कथं वेद्धव्यमिति सुन्दरेण रूपकेण ब्रूते - 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्दधीत। आयम्य तद्भागवतेन चेतसा लक्ष्यं तदेवाक्षरं सौम्य विद्धि'[18] इति। उपनिषदः (उपनिषदा तात्पर्येण उक्तः) महास्त्रस्वरूपाः धनुषः, सन्ततध्यानेन तीक्ष्णीकृतः संस्कृतः धनुः। ध्यानस्वरूपं धनुं उपनिषदि महास्त्रस्वरूपे सन्धाय इन्द्रियसहितमन्तःकरणं स्वस्वविषयेभ्यः (शुद्धचित्तेन) विनिवृत्य आयम्य लक्ष्ये अक्षरे चित्तलभ्ये ब्रह्मभवेन एव ताडयेत्। तत्रैव अक्षरस्वरूपे लीनो भवेत्।

---

[14] भ.गी-६-२३ [15] भ.गी-६-२८ [16] श्वेताश्वतर - २-१२ [17] मुण्डक - २-२-२ [18] मुण्डक-२/२/३

प्रणवस्वरूपमवलम्ब्य अक्षरस्वरूपे मनःसमाधातुं धनुरादिरूपकं विविच्य श्रुतिः वदति -

'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्' ॥[19] इति। प्रणवः एव धनुः 'सर्वे वेदाः यत्पदमामनन्ति'[20] इति श्रुतिरेव सर्ववेदसारस्वरूपं प्रणवः इति वदति। यथा इषु शरस्य आसनं, तथा आत्मशरस्य अक्षरे प्रवेशकारणमोङ्कारः। प्रणवस्य नैरन्तर्याभ्यासेन मनः सुसंस्कृतं भवति। प्रणवालम्बनेन चित्तप्रतिबन्धकाः नष्टा भवन्ति इत्यतः अक्षरे अवतिष्ठते साधकः। यथा धनुषा अस्तः इषुः लक्ष्ये ताड्यते तथा प्रणवाभ्यासेन संस्कृतचिताद् प्रणवालम्बनेन जीवः उपाधिलक्षणः शररूपः अक्षरे अवतिष्ठते। लक्ष्यं तु सर्वासामुपनिषदां साररूपं ब्रह्मैव। यतो हि अक्षरे मनःसमाधित्सुः लक्षं तु ब्रह्मैव। बाह्यविषयादिप्रविलापनेन शुद्धचित्तेन अप्रमत्तः विवकसहितः विरक्तः जितेन्द्रियः सन् एकाग्रतया ब्रह्मणि लक्ष्ये साधकः वेधयेत्। ताडनानन्तरं लक्ष्ये शरवत् ब्रह्ममयो भवेत्।

उपनिषदा यः अध्यात्मयोगः प्रतिपाद्यते मनसः विषयेभ्यः आकर्ष्यः बुद्धौ समाधानं तस्य चेष्टाविलयः इति चित्तशुद्धिरेव फलमिति तेन आत्मोन्मुखं करोति इति योगस्य फलम्।

एवं कठमुण्डकयोः उपनिषदोः योगविचारः चित्तवृत्तिनिरोधस्वरूपः प्रतिपादितः।

---

[19] मुण्डक -२-२-४ [20] कठ-१-२-२५

## उपयुक्तग्रन्थसूची


1. न्यायरक्षामणिः श्रीमदप्पय्यदीक्षितविरचितः। श्रीमदप्पय्य-दीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः, सिकन्दराबाद्, १९७१
2. दशोपनिषदः, शाङ्करभाष्यसहितम्, अद्वैतशारदा जालतणम्, श्रृङ्गिरिमहासंस्थानम्
3. ब्रह्मसूत्रम्, शाङ्करभाष्यसहितम्, अद्वैतशारदाजालतणम्, श्रृण्गगिरिमहासंस्थानम्
4. प्रश्नोपनिषत्, आनन्दगिरिविरचितटीकासंवलित-शाङ्करभाष्यसमेता तथा शङ्करानन्दविरचिता प्रश्नोपनिषद्दीपिका च, हरिनारायण आपटे, पुण्यपत्तनम्, आनन्दाश्रममुद्रणालयः, १८९६।
5. छान्दोग्योपनिषत् - आनन्दगिरिटीकासंवलितशाङ्करभाष्यसमेता, श्री कैलास आश्रम शताब्दी समारोह महासमिति, ऋषिकेश, डा. उमेशानन्द शास्त्री (सं.), १९८३।
6. बृहदारण्यकोपनिषत्, श्रीरङ्गस्थ-श्रीवाणीविलासमुद्रणालयः,१९१३
7. मुण्डकोपनिषत्, निर्णयसागरमुद्रणालयः, १९३२।
8. तैत्तिरीयोपनिषत्, श्रीरङ्गस्थश्रीवाणीविलासमुद्रणालयः, १९१३
9. श्वेताश्वतरोपनिषत्-शाङ्करभाष्य-तात्पर्यदीपिका-वयाख्यानयुगल-समृद्धा, भारतीय विद्या प्रकाशन, दिल्ली, २००२
10. ब्रह्मसूत्रशाङ्करभाष्यम्, निर्णयसागरमुद्रणालयः, मुम्बयि,१९३८
11. ऐतरेयोपनिषत्, सांस्क्रिट् डाक्युमेंट् जालताणम्
12. शाङ्करदर्शनमर्मप्रकाशः, प्रो. एम्.एल्.एन्. मूर्तिः (सं.), रा.सं.पिद्यापीठम्, तिरुपतिः, १९९६
13. archive.org

# 10

## खण्डकाव्यलक्षणविमर्शः

आर्. तिम्मणणः

काव्यानां विभागः बहुभिरालङ्कारिकैः बहुधा कृतः। परन्तु काव्यानां विभागकरणावसरे अनेकधा वयं साम्यं पश्यामः। एतस्य कारणं भारतीयाः पूर्वजाः विभागगणनाविषये न तावत् रुचिं प्रदर्शयन्ति। विभागे कृते यदि कश्चन लाभः अस्ति आहोस्वित् कृतः विभागः स्पष्टतया ज्ञायते चेदेव विभागकरणार्थं प्रवृत्ताः भवन्ति । एवं सति यदा तावत् काव्ये ध्वनिः प्रधानः (तत्रापि रसध्वनिरेव प्रधानः इति आनन्दवर्धनस्याशयः इति अभिनवगुप्तेनाप्यभिहितम्।) इति मतम् आरब्धम् तदा आरभ्य ध्वनिमाश्रित्य काव्यविभागकरणम् आरब्धम्। आनन्दवर्धनः एव ध्वनिकाव्यं गुणीभूतव्यङ्ग्यकाव्यं चित्रकाव्यम् इति काव्यस्य त्रैविध्यं प्रत्यपादयत्।

प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।
काव्ये उभे ततोऽन्यद्यत्तच्चित्रमभिधीयते॥[1]

तदनन्तरवर्तिनः आचार्याः अपि ध्वन्याधारेण आनन्दवर्धनाचार्येणोक्तं काव्यभेदमेव अङ्गीकुर्वन्। व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः॥[2]

---

[1] ध्वन्यालोकः 3-41 [2] काव्यप्रकाशः 1-4

परन्तु रसगङ्गाधरकारः आचार्यजगन्नाथस्तु ध्वन्याश्रयेणैव काव्यभेदान् दर्शयन् चतुरः भेदान् वदति। तद्यथा-

तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा। शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थम् अभिव्यक्तस्तदाद्यम्। यत्र व्यङ्ग्यम् अप्रधानम् एव सच्चमत्कारकारणं तद्वितीयम्। यत्र व्यङ्ग्य- चमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम्। यत्र अर्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम्॥[3]

यद्यपि आचार्यविश्वनाथेन कश्चन नूतनः विचारः उपदर्शितः परन्तु पन्थाः तु समानः एव। एवं सति ध्वन्याधारेण काव्यस्य विभागः बहुभिरङ्गीकृतः इति वक्तुं शक्यते।

ननु तर्हि एवं विभागे कृते नात्र खण्डकाव्यशब्दस्य प्रस्तुतिः। एतेषु खण्डकाव्यं कुत्र अन्तर्भवति इति न वक्तव्यम्। अयं कश्चन भेदकरणप्रकारः अत्र अस्मिन् भेदे सर्वत्रापि खण्डकाव्यस्य कश्चन भागः अन्वितः भवति। उदाहरणार्थम्-

त्वामालिख्य प्रणयकुपिता धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन् मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥[4]

अत्र नायकस्य औत्सुक्यभावः उत्कृष्टतया वर्णितः इति कृत्वा भावध्वनिः स्पष्टतया द्योत्यते। अतः एतत् उत्तमकाव्यस्य उदाहरणम्।

[3] रसगङ्गाधरः प्रथमाननम् [4] मेघदूतम् उत्तरमेघः 44

कस्तूरीवरपत्रभङ्गनिकरो भ्रष्टो न गण्डस्थले,
नो लुप्तं तव चन्दनं स्तनतटे धौतं न नेत्राञ्जनम्।
रागो न स्खलितस्तवाधरपुटे ताम्बूलसंवर्धितः,
किं रुष्टाऽसि गजेन्द्रमत्तगमने किं वा शिशुस्ते पतिः ॥[5]

अत्र तव पतिः शिशुः वा इति भावः श्लोके विद्यमानस्य प्रधानस्य शृङ्गाररसस्य अङ्गम्। परन्तु इदमङ्गमेव चमत्कृतिजनकं वर्तते इति हेतोः गुणीभूतव्यङ्ग्यकाव्यम्।

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः।
नद्यो विशालपुलिनान्तनितम्बबिम्बा मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥[6]

अत्र पद्ये शरत्काले नद्यः प्रमदाः इव मन्दं प्रयान्ति इत्यंशः रमणीयः वर्तते। अत्र न कापि ध्वनिः, अयमलङ्कारः। स च अर्थः कविना अभिप्रेतः। अतः अत्र चित्रकाव्यम्।

अत्र प्रस्तुतम् उदाहरणत्रितयमपि खण्डकाव्येभ्य एव उद्धृतम्। तत्र प्रथमं तावत् मेघदूतात्, द्वितीयं शृङ्गारतिलकात् तृतीयं ऋतुसंहाराच्च स्वीकृतम्। एवं ध्वनिः गुणीभूतव्यङ्ग्यकाव्यं चित्रकाव्यम् इति काव्यप्रभेदत्रितयमपि खण्डकाव्येषु सम्भवति इति सिद्धम्। तर्हि खण्डकाव्यम् इति काव्यप्रभेदः कथं परिकल्पितः इति विषयस्तु अवसितः एव।

[5] शृङ्गारतिलकम् 7 [6] ऋतुसंहारम् 3-3

तदुच्यते। काव्यं तावत् ध्वन्याश्रयेण पूर्वोक्तरीत्या विभक्तम्। परन्तु ततः पुनः दृश्यश्रव्यत्वभेदेन द्विधा विभक्तम्। **दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्**[7]। तत्र दृश्यकाव्यं रूपकम्। तत्र नाटकादीनि दश नाटिकादीनि अष्टादश च उपवर्णिताः। श्रव्यकाव्यं तु गद्यं पद्यं चम्पूः इति आदौ त्रिधा विभक्तम्। छन्दोनियमरहितं गद्यम्। तत्र गद्यकाव्ये अपि कथा आख्यायिका इति भेदद्वयम्। कादम्बरी कथायाः उदाहरणं हर्षचरितं च आख्यायिकायाः। कथायां कल्पितवस्तु आख्यायिकायां च वास्तविकं वृत्तं काव्यगुणसंयुक्तं वर्ण्यते। छन्दोनियमसहितं पद्यम्। चम्पूः नाम गद्यपद्यमिश्रबन्धः। तत्र कतिचन पद्यानि भवन्ति कतिचन गद्यभागाः अपि भवन्ति । पद्यकाव्ये पुनः महाकाव्यं खण्डकाव्यम् इति प्रभेदद्वयम्।

खण्डकाव्यस्य विस्तृतं लक्षणं साहित्यशास्त्रीयेषु ग्रन्थेषु न उक्तं वर्तते। एतस्य कारणद्वयं वयं चिन्तयितुं शक्नुमः। प्रथमं तु महाकाव्यलेखने कवयः साक्षात् न प्रवर्तन्ते। आदौ खण्डकाव्यमेव लिखन्ति इति कारणतः खण्डकाव्येषु वैशिष्ट्यं न्यूनं भवति।[8] काव्यतत्त्वानि तत्र महता प्रमाणेन सन्निहितानि न भवन्ति। यतोऽहि कविप्रतिभा तत्र तथा न परिपक्वा भवति। अतः काव्यशास्त्रलोके खण्डकाव्यनिरूपणावसरे सर्वत्रापि उपेक्षा एव दृश्यते। तथा हि कालिदासेन विरचितस्य अन्यस्य खण्डकाव्यस्य मेघदूताख्यस्य प्रसिद्धिस्तु नितरां वर्तत एव। तस्यापि अनेकानि व्याख्यानानि अभूवन्। परन्तु मेघदूतलेखनावसरे कालिदासस्य प्रतिभा अतीव

---

[7] साहित्यदर्पणः 6-1 [8] ऋतुसंहारम् कालिदासस्य प्रथमं काव्यमिति। तथा च कन्नडभाषायां रामायणदर्शनम् इत्याख्यस्य महाकाव्यस्य लेखनात्पूर्वं कुवेम्पुवर्येण अपि चित्राङ्गदा इति खण्डकाव्यं रचितम् आसीत् इत्यादयः दृष्टान्ताः स्मर्तव्याः।

परिपक्वा आसीदिति विदुषामभिप्रायः। यतो हि कालिदासेन कृतं प्रकृतिवर्णनं वयम् आधिक्येन मेघदूतकाव्ये एव पश्यामः। यद्यपि ऋतुसंहारकाव्ये केवलानां ऋतूनां वर्णनायैव कविः प्रवृत्तो वर्तते न किञ्चित् तस्य अन्येषु विषयेषु मतिः तथापि कविरत्र न तथा प्रकृतिं सुन्दरतया वर्णयति यथा मेघदूते। एवं परिपक्वाः अपि कवयः कथावस्तुनि अल्पे सति खण्डकाव्यं कुर्वन्तीति वक्तुं शक्यते।

यद्यपि खण्डकाव्यस्य लक्षणं कण्ठतः कविभिर्नोक्तं तथापि काव्यलक्षणानाम् अवलोकनेन इदं ज्ञातं भवति यत् खण्डकाव्ये प्रायेण महाकाव्यलक्षणमेव अन्वितं स्यात् इति। नाटकलक्षणकथनावसरे आचार्यविश्वनाथः विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् इत्यवोचत्। तन्नाम नाटकलक्षणकथने तावत् सर्वोऽपि विचारः विस्तरेण उच्यते। प्रकरणादीनाम् रूपकाणां नाटकादीनाम् उपरूपकाणां च लक्षणं तावत् तथा विस्तरेण नोच्यते। नाटकात्तेषां भेदमात्रं स्मार्यते। तेन नाटकस्य बहूनि लक्षणान्यत्राप्यन्वितानि स्युरित्यंशः अवश्यम् अवगन्तव्यः। तथा हि महाकाव्यस्य लक्षणमुक्त्वा खण्डकाव्यस्य लक्षणकथनावसरे कतिचन अंशाः उक्ताः साहित्यदर्पणादिषु ग्रन्थेषु। तत्रादौ महाकाव्यस्य लक्षणं किम् इति दृष्टे खण्डकाव्यस्य लक्षणं स्पष्टतया दृष्टिपथमायाति।

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥

.........

वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥[9]

इति महाकाव्यस्य लक्षणमुक्तम्। अत्र विद्यमानानि सर्वाण्यपि लक्षणानि खण्डकाव्ये अन्वयं न प्राप्नुवन्ति। परन्तु बहुविधानि लक्षणानि खण्डकाव्यानां वर्तन्ते एव। महाकाव्ये नायकः स्यादेव। सः एकः वा स्यात् अथवा एकवंशभवा भूपाः इत्युक्तदिशा समानवंशे जाताः वा स्युः। परन्तु खण्डकाव्ये अस्मिन् विषये नैर्भर्यं नास्ति। नायकः स्याच्चेदपि भवति। नो चेदपि खण्डकाव्यत्वस्य हानिर्न भवति। तथा हि सति नायके सः शूरः धीरोदात्तादिगुणयुक्तः एव स्यादिति नास्ति नियमः। कालिदासेन कञ्चन यक्षमेव नायकत्वेन कल्पयित्वा मेघदूतं विरचितम्। अतः नायकविषये नैर्भर्यं खण्डकाव्ये नास्तीति वक्तुं शक्यते।

रसविषयेऽपि अत्र कोऽपि नियमो नास्ति। महाकाव्येषु तु शृङ्गारवीरशान्तयोरन्यतमः रसः स्यात् खण्डकाव्ये तावत् यः कोऽपि रसः भवितुमर्हति। नाटके विद्यमानाः सन्धयः सन्ध्यङ्गानि च सर्वाणि महाकाव्येऽपि अवश्यं भवन्ति। कथावस्तुचयने अपि कवेः स्वातन्त्र्यं खण्डकाव्ये अधिकं भवति। कारणं नाम तत्र खण्डकाव्ये कथाभागः अत्यल्पः भवति इति कारणतः कविः स्वयं यत्किमपि कथावस्तु कल्पयितुमपि शक्नोति। न तथा कथायाः प्राधान्यमत्र वर्तते यथा महाकाव्यादिषु। अतः कथा इतिहासप्रसिद्धा वा स्याद् अथवा कविकल्पिता वा। अत्र तथा महान् भेदः न दृश्यते एव। प्रायेण खण्डकाव्येषु इतिहासप्रसिद्धकथायाः अपेक्षया कविकल्पितं वस्तु एव

[9] साहित्यदर्पणम् - 6, 315-324

भवति। क्वचित् श्लोकेष्वेव इतिहासप्रसिद्धकथायाः अन्तर्वेशं कुर्वन्ति। तद्यथा-

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः॥[10]

मेघदूतखण्डकाव्यस्य कथायां तु यक्षस्य कथायाः एव प्राधान्यं परन्तु एकेन श्लोकेन कविः इदमपि निरूपयति यद् पूर्वं काचित् घटना प्रवृत्ता इति। बृहत्कथायाम् उदयनवासवदत्तयोः कथा प्रसिद्धा। अयं श्लोकः तस्याः कथायाः आधारेण विरचितः। एवं प्रसिद्धायाः कस्याश्चित् कथायाः स्पर्शोऽप्यत्र कर्तुं शक्यः। एतादृशान्युदाहरणानि महाकाव्येष्वपि लभ्यन्ते। परन्तु तत्र मुख्यकथा अपि इतिहासप्रसिद्धा एव स्यादिति भेदः।

महाकाव्ये तु सामान्यतया अष्टाधिकाः सर्गाः भवेयुरिति नियमः। परन्तु खण्डकाव्ये न तथा । दशोनाः सर्गाः एव भवन्ति खण्डकाव्येषु। शृङ्गारतिलकम्, चोरपञ्चविंशतिः, वेतालपञ्चाशिका इत्यादिषु खण्डकाव्येषु अल्पानां पद्यानाम् एकः एव सर्गः विद्यते। तथा हि क्वचित् सर्गद्वयं क्वचित् त्रिचतुराः पञ्चषाः वा सर्गाः भवन्त्येव। परन्तु प्रतिसर्गं कश्चन समानः विषयः उपस्थाप्यते। प्रकृते ऋतुसंहारे एव प्रतिऋतु एकः सर्गः इत्याहत्य षट् सर्गाः विरचिताः कविना।

---

10 मेघदूतम् पूर्वमेघः 34

महाकाव्येषु अष्टादशानामपि वर्णनानां सन्निवेशः स्यात्। खण्डकाव्ये न तथा, केषाञ्चनवर्णनानामेव सन्निवेशः क्रियते चेदप्यलम्। तथा हि खण्डकाव्यस्य गात्रमपि अत्यन्तं न्यूनमिति कृत्वा सर्वाण्यपि वर्णनानि योजयितुमशक्यानि इत्यप्यवगन्तव्यम्। पुनश्च सर्वेषामपि वर्णनानां योजनेन न तथा चारुत्वं खण्डकाव्ये भासते। यतो हि खण्डकाव्यरचनावसरे कविबुद्धिः तथा परिपक्वा न भवतीति पूर्वमेव उक्तम्। तादृशस्य कवेः वर्णनावसरे व्यर्थतया वर्णनानि योजयन्ति चेत् पायसे शिलाखण्डाः इव वर्णनं भासेत। महाकवीनां भारविमाघादीनां विषये एव एतादृशस्थलेषु बहुविध-आरोपाः दृश्यन्ते किं पुनः खण्डकाव्यरचयितॄणां कवीनाम्। नायककव्यादीनाम् औचित्यमाश्रित्य महाकाव्यस्य नाम करणीयम् इति यः नियमः महाकाव्ये दृश्यते स एव नियमः खण्डकाव्येष्वप्यस्ति।

इत्थं महाकाव्यखण्डकाव्ययोः वैशिष्ट्यं प्रतिपादितम् तदेवोक्तम् खण्डकाव्यलक्षणकथनावसरे विश्वनाथेनापि-

भाषाविभाषानियमात्काव्यं सर्गसमुज्झितम्।
एकार्थप्रवणैः पद्यैः संधिसामग्र्यवर्जितम् ॥
खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च।[11]

काव्यस्य एकदेशानुकारि गद्यकाव्यं भवति इति सर्वस्यापि अस्य आशयः।

केचन शतककाव्यान्यपि खण्डकाव्यकोटावेव अन्तर्भावयन्ति। परन्तु शतककाव्यानां मुक्तकसङ्ग्रहानां स्तोत्रकाव्यानां वा

[11] साहित्यदर्पणः 6-328

खण्डकाव्यकोटावन्तर्भावः न सुचिरः। यतो हि खण्डकाव्येषु यद्यपि बहुत्र समानः रसः आश्रीयते परन्तु न तत्र काचित् कथा। प्रतिपद्यमपि पार्थक्येन व्याख्यातुं शक्नुमः एव। अतः प्रतिपद्यव्याख्यानावसरेऽपि विभिन्नः रसः भवति इत्यत्र नास्ति सन्देहः।

ननु अत्र अमरुशतकादिशतककाव्येषु मुख्यरसः शृङ्गारः एव। कथं प्रतिपद्यं विभिन्नः रसः इति कथ्यते इति चेत् सत्यम्। प्रतिपद्यमपि शृङ्गाररसाभिव्यञ्जनं वर्तते। परन्तु तत्र प्रतिपद्यं शृङ्गारः इति वयं वदामः। न हि प्रबन्धरसः अत्र शृङ्गारः। मेघदूतखण्डकाव्ये तु प्रबन्धरसरूपेण शृङ्गारं वक्तुं शक्नुमः। यतो हि तत्र प्रतिपद्यं परस्परं सम्बन्धः विद्यते। अमरुशतकादिशतकाव्येषु न तथा प्रतिपद्यं सम्बन्धः। अतः शतककाव्यम् इति विभिन्नप्रकारः एव वक्तव्यः न तु खण्डकाव्येष्वन्तर्भावयितुं शक्यः।

स्तोत्रकाव्यानि तु परस्परं सबन्धयुक्तपद्यैरेव उपनिबद्धानि भवन्ति। अतः तेषामपि खण्डकाव्यत्वं स्याद् इति चेत् न। यतो हि स्तोत्रकाव्येष्वपि यद्यपि कस्यचित् देवस्य कस्यचित् देव्याः वा वर्णनं क्रियते तथापि सर्वाण्यपि पद्यानि परस्परसापेक्षाणि तु न भवन्ति। अतः एव-

> महीं मूलाधारे कमपि मणिपूरे हुतवहं।
> स्थितं स्वाधिष्टाने हृदि मरुतमाकाशमुपरि।
> मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
> सहस्रारे पद्मे सह रहसि पत्या विहरसि॥[12]

---

[12] सौन्दर्यलहरी 9

इत्यस्मात् एकस्मात् एव पद्याद् महान् भक्तिभावः अभिव्यज्यते। समग्रस्य सौन्दर्यलहरीग्रन्थस्य पठनेन अपि या भगवद्विषयिणी रतिः उत्पद्यते सा रतिः एकस्यैव श्लोकस्य पठनेन अपि उत्पद्यते। अतः अत्र प्रबन्धरसपद्यरसयोः साम्याद् स्तोत्रकाव्यानामपि पृथक्तया काव्यत्वमेव न तु खण्डकाव्ये अन्तर्भावः। यदि खण्डकाव्ये स्तोत्रकाव्यानाम् अन्तर्भावः क्रियते तर्हि शतककाव्यानामपि बहूनां खण्डकाव्ये अन्तर्भावः स्यादेव।

एवं सति ऋतुसंहारस्यापि खण्डकाव्यता इति प्रश्नः मनसि समुदीयेत। यतो हि ऋतुसंहारे अपि क्वचित् एकस्मात् पद्यात् यः शृङ्गारः रसः उत्पद्यते स च प्रबन्धरससमानः एव। अपि च कतिचन पद्यानि तत्रापि निरपेक्षाणि वर्तन्ते। परन्तु तत्र कतिचित्पद्यानि नीरसानि अपि वर्तन्ते। 'ननु तर्हि प्रबन्धान्तर्वर्तिनां केषांचिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्? न, रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन, प्रबन्धरसेनेव तेषां रसवत्ताङ्गीकारात्। यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावद्दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः स सादिमत्काव्यबन्धसामायाद्गौण एव' ॥[13]

इत्युक्तदिशा ऋतुसंहारे विद्यमानानाम् अनेकेषां पद्यानां रसपरतया व्याख्यानं शक्यम्। अन्यथा तत्रत्यानि अनेकानि पद्यानि काव्यत्वमेव न प्राप्नुयुरिति विप्रतिपत्तिरस्त्येव। शतककाव्येषु स्तोत्रकाव्येषु च न तथा। तेषां तु प्रतिपद्यं काव्यता विद्यते एव। न हि तत्र नीरसपदमेकमपि विद्यते। एवं ऋतुसंहारस्य

[13] साहित्यदर्पणः प्रथमः परिच्छेदः।

खण्डकाव्यत्वे नष्टे काव्यत्वमेव न सिद्ध्येत्। तस्माद् ऋतुसंहारस्य खण्डकाव्यत्वमवश्यमङ्गीकरणीयम्।

यथा काव्यप्रपञ्चे महाकाव्यस्य विषये समादरः दृश्यते न तथा खण्डकाव्यस्य विषये समादरः दृश्यते। अस्य कारणानि एवं भवितुमर्हन्ति।

- खण्डकाव्ये वस्तु अत्यन्तं लघु भवति। उदात्तं न भवति।
- खण्डकाव्ये वर्णनायाः अवसरः न्यूनः।
- प्रबन्धरसे मुख्ये अभिव्यञ्जिते अङ्गरसानाम् अभिव्यञ्जनाय अवसरः न्यूनः भवति।
- छन्दोवैविध्यं दर्शयितुम् अशक्यम्।
- कवेः प्रतिभायाः समग्रतया उपयोगः न भवति।
- सहृदयस्यापि भावयित्रीप्रतिभायाः पर्याप्तमात्रेण सामग्री न लभ्यते।
- अनेके कवयः महाकाव्यरचनार्थमभ्यासाय इदं कुर्वन्ति इति कारणतः परिपक्वता न दृश्यते।

यद्यपि खण्डकाव्यं न तथा लक्षणकारैः कविभिश्च मानितं तथापि खण्डकाव्यस्य अनेकानि दृष्टप्रयोजनानि तु वक्तुं शक्नुमः एव। तद्यथा-

- खण्डकाव्ये निरूपणीयमल्पमस्ति इति कृत्वा कविः तत्र प्रवृत्तिं झटिति कुर्यात्।
- खण्डकाव्यानां न्यूनगात्रत्वात् सहृदया अपि खण्डकाव्याध्ययने प्रवृत्ताः स्युः।
- खण्डकाव्ये क्वचित् व्यर्थवर्णनाभावात् प्रतिपदमपि आस्वादनयोग्यं भवेत्।

- महाकाव्ये विद्यमानं वर्णनवैशाल्यम्, वर्णनबाध्यता च नास्ति इति हेतोः कवेः स्वाभाविक्याः प्रतिभायाः प्रदर्शनाय खण्डकाव्यम् अवसरं कल्पयति।
- खण्डकाव्यम् अखण्डरूपेण सकृत् पठितुं शक्यम्। अतः सहृदयहृदये अभिव्यक्तः रसः काव्यसमाप्तिपर्यन्तम् अव्यक्तदशां न गच्छेत्। (महाकाव्यादिषु तु दैर्घ्यहेतोः सहृदयः मध्ये मध्ये पठनं त्यजेत्। तेन रसानुभवे विच्छित्तिः जायेत।)
- खण्डकाव्यानां नाट्यरूपान्तरणे अपि नटाः प्रवर्तेरन्। मेघदूतस्य अनेकाः ईदृश्यः प्रस्तुतयः प्रसिद्धाः एव। तेन हि श्रव्यकाव्यस्य दृश्यकाव्यत्वेन परिणमनं भवति।
- कवीनां प्रारम्भिकाभ्यासाय खण्डकाव्यरचनं अत्युत्तमः विकल्पः। खण्डकाव्यरचनया कृताभ्यासाः परिपक्वप्रतिभाः च कवयः सुन्दराणि महाकाव्यानि लेखितुं प्रभवेयुः।
- खण्डकाव्यपठनेन सहृदयाः अपि महाकाव्यपठने प्रविशेयुः।

एवं खण्डकाव्यं महाकाव्यस्य द्वारभूतम् इति वक्तुं शक्नुमः। एवं अनेकासु न्यूनतासु सत्स्वपि खण्डकाव्ये घनात्मकांशाः अपि विद्यन्ते एव। अतः एव व्याख्यानशिरोमणिः मल्लिनाथः माघे मेघे गतं वयः इति वदति। महाकाव्येन शिशुपालवधेन समं मेघदूतखण्डकाव्यम् इति एतेन वक्तुं शक्नुमः। यथा महाकाव्यस्य शिशुपालवधस्य व्याख्यानावसरे क्लेशाः, आनन्दश्चानुभूतः तथा मेघदूतस्य व्याख्यानावसरे अपि इति मल्लिनाथोक्तेराशयः। गात्रदृष्ट्या पश्यामः चेत् मेघदूतस्य दशगुणितमधिकम् शिशुपालवधम्। तथापि गुणवत्ता तु समाना एव। एवं कश्चन प्रतिभावान्

कविः खण्डकाव्यमपि महाकाव्यत्वेन परिवर्तयितुं शक्नोति इत्येतेन ज्ञायते ।

एवं काव्यतत्त्वज्ञैः अनादृते अपि खण्डकाव्यप्रकारे बहूनि खण्डकाव्यानि विरचितानि विद्यन्ते। तत्रापि मेघदूतस्य अनन्तरं दूतकाव्यपरम्परा एव समारब्धा। तत्र प्रायेण उपपञ्चशानि दूतकाव्यानि समुपलभ्यन्ते। एवमेतानि सर्वाण्यपि काव्यानि खण्डकाव्येष्वन्तर्भवन्ति ।

**उद्धृतग्रन्थसूची -**


1. ऋतुसंहारम् - चन्द्रिकाव्यख्यया समेतम्, वसुदेवशर्मा, निर्णयसागरः मुद्रणालयः, मुम्बई, १९२२.
2. काव्यप्रकाशः; पं.डुण्डिराजशास्त्री; चौखम्बा मुद्रणालयः,बेनारस्.
3. ध्वन्यालोकः; डा.प्रदीप्त कुमार पण्ड; शिवालिक प्रकाशन, देहली; 2015.
4. मेघदूतम्, इन्दुकलाव्यख्योपेतम्, श्री वैद्यनाथ झा शास्त्री, कृष्णदास अकादमी, वाराणसी.
5. रसगङ्गाधरः, मिश्र श्री नारायण, विद्या वाचस्पति झा शशिनाथ, Chowkhama Krishnadas Academy, Varanasi, 1988.
6. साहित्यदर्पणः; देवदत्तकौशिकः; भारतीयविद्याप्रकाशनम्, 1978.

Volume 6, Issue 2

# 1

## Means-Ends Analysis in Artificial Intelligence and Mimāṁsā

K. S. Kannan

A frontier field of Computer Science today, Artificial Intelligence (AI) has forayed into tackling problems humans do with their intelligence. After initial major failures, AI has learnt to take up problems, and analyze & algorithmize the means leading towards the specific ends. Problem Solving and Means Ends Analysis (MEA) are significant issues in AI. Purva Mimāṁsā (M), a centuries old system of Indian philosophy in contrast, set about to handle the problem of Vedic rituals. In its theory of Bhāvanā, M traces the path from utterances through enterprise to the realisation of the result, focussing though on the Vedic. The roles of know-why and know-how - goals and strategies - naturally figure here too. The present paper seeks to compare the two.

> "इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ॥"
> "इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥"

**0 Arrangement of the paper:** The paper is arranged in four sections. §1 places the problem in perspective, comparing & contrasting AI & M, in their aim, scope & methods. §2 gives an outline of MEA in AI. §3 gives a fairly detailed account of Bhāvanā, the M theory of

action involving MEA. Finally, §4 gives some concluding remarks.

**1.0** AI and M have many resemblances, though more differences also. Both are concerned with problem solving, though AI is quite becoming a technological reality, and M still shows some signs of life as a philosophical tradition. AI is hardly as many decades old, as centuries old M is. The clarity, rigour and compass of M (see for example, its relevance to jurisprudence) serve as a window to the vigour of the formidable force that M once was. The utility and pertinence of its framework and presuppositions have also been assailed and undermined through history; much as there had till recently been misgivings and queries - from philosophers as well as computer scientists themselves - regarding the possibility and viability of AI. Neither issue however concerns us here.

**1.1** M generally restricted itself in 2 ways:
a) confine to the Vedic arena where the ritual *actions* are the natural focus. And
b) towards this *end,* develop *methods* to *understand* the Vedic text, the "exclusive" source and *means* for getting to know about the ultimate goal, Dharma, 'merit', whatever it meant (cf. the oft repeated वेदबोधितेष्टसाधनताको धर्मः ।)

AI, on the other hand, casts a very wide net. Simulation of human intelligence as much as possible is its avowed goal. Language understanding is thus one of its important targets. Robots are being developed to perform actions, following appropriately encoded instructions.

**1.2** Dealing as it does with a highly specialized field viz. Vedic rituals, M naturally developed a system of analysis and synthesis which is highly domain specific and "peculiar". For example, the performance of the various sacrifices - with their implicit presuppositions or defended implications, all "given" as it were - have hardly any counterpart in issues AI concerns itself with or seeks to tackle.

**1.3** But in another area, commonalities can be found. M seeks to "work out" the procedures and details of the sacrificial act along with their functions as set out in the Vedas, as we noted above. For this purpose, the Vedic text - at least such portions as are relevant for the rituals, and which are large enough, in fact - has to be interpreted. And the interpretation naturally needs to be as universally acceptable as possible. And the modus operandi for this purpose should largely accord with - at least not deviate widely from - normal patterns or methods of any reasonable or usual understanding of texts. Here lies then, the province of shared concerns between AI & M.

M raises numerous issues in interpretation, develops procedures and posits theories, which can all be of some interest, even use, to AI.

Differences do not cease, however, even here. M deals with the *human* understanding of texts and humans are endowed with *common sense*. Little overlaps here with AI. But any degree of formalization can surely have lessons for AI, which it may choose to adapt or avoid.

**1.4** This paper totally ignores *this* interesting problem, reserving it for a subsequent paper, and limits itself to the *formalization attempted in M* as far as the translation of 'commendatory' (*arthavāda*) or 'imperative' (*vidhi*) utterances to fruitful functions sustained by a sober MEA vis-a-vis the AI approach. The paper is by no means exhaustive. The Bhāvanā theory of M is of course its focus.

**2.0** A skeletal view of MEA in AI along with some background information is attempted in this section (leaving out a great deal of technicality though of essence) placing the barest details of matter that can be of some interest here, but also for future development.

**2.1** Commenting on the genesis of AI, Herbert Simon notes that "early research in AI was directed mainly at studying well-structured puzzle-like tasks, where human behaviour in the laboratory could be compared with the traces of computer programs" (Simon 1987:xi). As far back as 1945, Duncker had emphasised, he further notes, MEA as a central tool for solving problems. Typical of them were playing chess and the Tower of Hanoi problems. Already in the early sixties, Simon and Kotovsky had attempted the "Series completion" problem.

Two issues have loomed large in AI –

a) retrieval of associated information from semantic or long term memory and
b) engendering certain actual motor responses.

The development of high-level programming languages and robotics, have been the result of these, making possible the developments we see in AI in respect of sense perception, language processing & robotics, as also application to as diverse but specific disciplinary problems as architecture and chemistry.

Around 1970 itself, Newell had noted that problem solving was the most important issue for AI, as also being one of the most difficult topics in cognitive psychology. AI programs for solving problems in mathematics were developed by Lenat in the late sixties. In Anderson 1987 have been discussed certain issues of psychology but also specifically, solving elementary proof problems in geometry, with a system involving what are called semantic structures & production rules.

The role of MEA on the whole is of great importance. For rather than the creation of a bunch of special purpose expert systems, focus on theoretical issues in AI helps and is helped by attempting comprehensive architectures that are cognitively modelled. This is not easy either: most of the mental processes go on below the level of conscious awareness, and “thinkaloud” protocol analyses yield not much of nontrivial information.

**2.2** Stated broadly, MEA consists in taking stock of what is given & what is desired, and settling on a sequence of actions. Its use began as early as 1957 with the General Problem Solver (GPS), where it figured first. Newell, Shaw and Simon attempted the first problem solving program.

The way to solve the "state space problems" is to start with an "initial state" and reach a set of "goal states", (represented as S g1 ⌒g2 ⌒g3 ... where, 'S' the state of affairs, is presented as a conjunction '⌒', of varied goals g1, g2 etc.). This is done by the use of a given set of "operators", affecting certain states on the domain. The operator affects some states, leading to new states, upon which another operator may act, all cumulatively leading to the desired final goal state.

